
कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

॥ अद्वयरामस्येदं पुस्तकं ॥ १

Checked 2012

Acc. No. ~~4732~~ M-1632
Title - प्रक्रियाभूषण
Author - श्रीनिवासदास.
Date - ?

folio - 54.
Xerox - 103
Sub - व्याकरण.

1

प्र० भू०
१

श्रीमते रामानुजाय नमः श्रीशं नत्वा गुणग्रामं संक्रियते मुग्धसंविदे श्रीश्रीनिवासदासेन प्रक्रियाभूषणं
गिरः १ अइउऋऌ समानाः अनेन क्रमेणैते वर्णा ज्ञेयास्ते च समानसंज्ञाः स्युः नैतेषु सूत्रेषु संधिरविवक्षि
तत्वाद्धि विवक्षिते तु संधिः स्यात् ह्रस्वदीर्घप्लुतभेदाः सवर्णाः एषां ह्रस्वादिभेदाः परस्परं सजातीयाः सवर्णाः स्युः
एकमात्रो ह्रस्वः द्विमात्रो दीर्घः त्रिमात्रः प्लुतः व्यंजनमर्धमात्रकं एषामुदात्तादिभेदाः अपि स्युः उच्चैरुदात्तः
नीचैरनुदात्तः समवृत्तिः स्वरितः अनुनासिकोऽननुनासिकश्च एऐओऔ संध्यक्षराणि एषां ह्रस्वा न स्युः उभ
ये स्वराः अकारादयः एकारादयश्चोभये स्वराः स्युः अवर्जा नामिनः अवर्णवर्जाः स्वरा नामिनः स्युः अथ हसा
उच्यंते हयवरल ञणनङम झढधघभ जडदगब खफछठथ चटत कपशषस आद्यंताभ्यां प्रत्याहारा या
द्यंताभ्यां संहिते ते वर्णा ग्राह्याः आदिरंत्येन सह गृह्यमाणस्तन्नामप्रत्याहारः अइउऋऌएऐओऔहयवरल
ञणनङमझढधघभजडदगबडस्यप्रत्याहारः चटतकप इति चप जडदगब इति जब एवं ऋनङलप्रभृतिः
हसा व्यंजनानि हादयः सांता हसा व्यंजनानि स्युः तेषूच्चारणार्थः कार्यापेत् कार्यायोच्चार्यमाणो वर्णोऽत्सं
ज्ञः स्यात् यस्येत्संज्ञा तस्य लोपः वर्णादर्शनं लोपः प्रत्ययादर्शनं लुक् वर्णविरोधी लोपस्स मित्रवदागमः
शत्रुवदादेशः स्वरैरनंतरिता हसाः संयोगः कुचुटुतुपु वर्गाः अकारांतं च यो वर्णस्तमाहुः पंचवकयहेड
लिंवचनात् उकारः अरेदो नामिनो गुणः अर एदो गुणसंज्ञिकास्ते नामिनः स्थाने स्युः आरैऔ वृद्धिः आआ
रऐऔ वृद्धिसंज्ञाः स्युः अंत्यस्वरादिः टिः अंत्यस्वरादिवर्णो टिसंज्ञः स्यात् अंत्यात्पूर्व उपधा अंत्याद्वर्णमात्रा

च२
१

त्पूर्वो यो वर्णः स उपधासंज्ञः असंयोगादिपरो ह्रस्वो लघुः विसर्गानुस्वारसंयोगपरो गुरुः दीर्घश्च मुखनासि
कावचनोनुनासिकः तपरस्तावन्मात्रार्थः बिंदुरनुस्वारः बिंदुद्वयं विसर्गः इति संज्ञा॥ अथ स्वरसंधिरभिधी
यते दध्यानय इति स्थिते इयं स्वरे इवर्णो यत्वं याति स्वरे परे हसे हसः स्वरात्परो रहवर्जो हसो हसे परे द्विः
तिष स्यात् यद्यादेशस्तद्वत्स्यादिति स्थानिवद्भावे प्राप्ते न तु वर्णमात्रविधाविति वर्णमात्रविधेर्न द्वित्वनिषेधः इ
ति धस्य द्वित्वं झबे जबाः झसानां झबे परे जबाः स्युः इति पूर्वधस्य दः वर्गे वर्गेण सवर्णो इति वचनात् यथा
संख्यं वावचनं स्वरहीनं परेण संयोज्यं दध्यानय इति सिद्धं गौरी अत्र राध्यमादिः स्वरपूर्वाद्रेफात्परो य
यो द्विः स्यात् जलं तु विकल्पाद्रेफो द्वे गमनं गौर्य्यत्र हर्य्यनुभवः सुश्रान्तो हरिः कार्यासिद्धो सत्रांनरात्पदांतरार
नुवृत्तिर्ज्ञेयाः उवं उवर्णो वत्वं याति स्वरे परे मधु अत्र मध्वत्र ऋरं ऋवर्णो रत्वं याति स्वरे परे पितृ अर्थः पि
त्रर्थः लृलं लृवर्णो लत्वं याति स्वरे परे लृ अनुबंधः लनुबंधः एअय् एदयस्मात्स्वरे ने अनं नयनं ओअव्
ओदवस्मात्स्वरे लो अनं लवनं गवादिस्तादावावकव्यः टित्किताबाद्यंतयोर्वक्तव्यो गो अग्रः गवाग्रः गो
इंद्रः गवेंद्रः प्रऊढः प्रौढः अक्षऊहिणी अक्षौहिणी स्वईरं स्वैरं ऋ वित्स्वरवद्यकारः गोयूतिः गव्यूतिः ऐ
आय् ऐकार आयस्मात्स्वरे नै अकः नायकः औआव् औकार आवस्मात्स्वरे लौ इह लाविह य्वोर्लोपश्चा
वापदांते पदांते स्थितानामयादीनां यवयोर्लोपश्च वा स्यात् ते आगता त आगताः तयागताः पटो इह
पट इह पटविहः तस्मै इदं तस्मा इदं तस्मायिदं लौ इह ला इह लाविह लोपश्चिन्न संधिः छंदसि नुस्या

ता० १

प्र० सं० २ टि० टि०

एदोतोतः पदांते स्थितेदेतोर्नस्य
नु हे सखे इति हे सखेति हे सखयिति न लोपश्चपि दाम नु दरः दामोदरः
परस्यातो लोपः स्यात् तेऽत्र तेत्र पटोऽत्र पटोत्र समानः सवर्णे दीर्घः सह समानस्य सवर्णे परे सह दीर्घः स्यात् नस्य
द्वात्र त्र अद्य द्वात्र पर्जन्यवल्लक्षणप्रवृत्तिर्न्यायात् दीर्घस्यापि दीर्घः दंड अग्रं दंडाग्रं दधि इह दधीह नानु इद
यथा नूदयः सामान्याद्विशेषो बलवान् परेण पूर्वबाधो वा प्रायश इत्युक्तेः शियंखरे इत्यादिना अइउण अवर्ण
इवर्णे परे सह ए स्यात् तव इदं तवेदं हलादेरीषायां हेर्लोपो वक्तव्यः हल ईषा हलीषा लांगल ईषा लांगली
षा मनस ईषा मनीषा सीमन् अंतः सीमंतः कुल अटा कुलटा पतत् अंजलिः पतंजलिः आकृतिगणोयं
उ ओ अवर्ण उवर्णे परे सह ओ स्यात् गंगा उदकं गंगोदकं ऋ अर् अवर्णात् ऋवर्णे परे सह अर् स्यात् तव ऋद्धिः
तवर्द्धिः ऋ ऌ विहार अवर्णात् ऋवर्णे परे सह ऋ विहारस्यात् ऋण ऋणं ऋणार्णं शीत ऋतः शीतार्तः ऌ अल् अ
वर्णात् ऌवर्णे परे सह अल् स्यात् तव ऌकारः तवल्कारः ऋ ऌवर्णयोर्मिथः सावर्ण्यं वाच्यं होतृ ऌकारः होतॢ
कारः रलयोः सावर्ण्यं वाच्यं परि अंकः पर्यंकः पल्यंकः ऐ ऐ अवर्णात् एकारे ऐकारे च परे सह ऐ स्यात् तव ए
षा तवैषा तव ऐश्वर्यं तवैश्वर्यं ओ औ औ अवर्णात् ओकारे औकारे च परे सह औ स्यात् तव ओदनं तवौदनं त
वौ नित्यं तवौ नित्यं ओष्ठोत्वोर्वा अवर्णस्य ओष्ठोत्वोः परयोर्वा सह औ स्यात् समासे बिंब ओष्ठः बिंबोष्ठः बिं
बौष्ठः स्थूल ओतुः स्थूलोतुः स्थूलौतुः समासे किं तवोष्ठः इति स्वरसंधिः नामी अश्व सो ऽमी रामः संधिं न
याति अमी आद्यास्तः द्विवे इ दंत ऊ दंत ए दंत स्वरा ह्लौ द्विवे वर्तमानः संधिं न याति अमी अत्र पटू अत्र

२

मालेआनय ओंनिपातः एकस्वरो निपातः संधिं न याति आ एवं मन्यसे नो अत्र स्यात् वं अ अपेहि उ उत्तिष्ठ दूरा

प्लुतः स्यात् २ द्वाने दूरात्संबोधने वाक्यस्य टेः प्लुतः संधिं न याति देवदत्त३ एहि हे हे प्रयोगे हे हयोः प्लुतो वा ग हे३ अव

हाय व हे इ शाद् हयीश अप्लुतवदितौ देवदत्तेति इति प्रकृतिः चपा अबे जबा पदांते वर्त्तमानाश्चपा जबाः स्यु

रबे परे अच् अंतः अजंतः षट् अत्र षडत्र ञमे ञमा वा पदांते वर्त्तमानाश्चपा ञमे परे ञमा वा स्युः वाक्मात्रं

वाङ्मात्रं वाग्मात्रं प्रत्यये ञमे ञवस्यापि नित्यं ञमाः तन्मयं तन्मयं चपाच्छः शः चपादुत्तरस्य शस्य छो वा

स्यात् वाक्शूरः वाक्छूरः होझभाः चपादुत्तरस्य हस्य झभा वा स्युः यद्वर्गगश्चपस्तद्वर्गगश्च तुर्यः तत्

वाग्घरिः १ हविः तद्धविः तद्हविः वाक् हरिः वाग्घरिः वाग्हरिः स्तोः श्चुभिः श्चुः सकारतवर्गयोः शकारचवर्गाभ्यां योगे य

थासंख्येन शकारश्चवर्गौ स्तः उद्दिश्यमानप्रतिनिर्दिश्यमानयोः संख्यासाम्ये यथाक्रममिति वाच्यं कस्

चरति कश्चरति कसस्तर कश्शूरः तत्‌चित्रं तच्चित्रं तत्‌शास्त्रं तच्छास्त्रं तत्र शात् शादुत्तरस्य तवर्गस्य चु

त्वं न स्यात् विश्नः विश्नः प्रश्नः ष्टुभिः ष्टुः सकारतवर्गयोः षकारटवर्गाभ्यां योगे षकारटवर्गौ स्तः कस्‌षष्ठः

कष्षष्ठः कसटीकते कष्टीकते तत्‌टीकते तट्टीकते तत्‌टीका तट्टीका न षे षकारे परे तवर्गस्य ष्टुत्वं

न स्यात् भवान्‌षष्ठः टोरंत्यात् पदांते वर्त्तमानाट्टवर्गात्परस्य स्तोः ष्टुर्न स्यात् षट्‌नरः षट्‌नरः षट्‌सीदंति

षट्सीदंति तोर्लिलः तवर्गस्य ले परे लः स्यात् तत्‌लुनाति तल्लुनाति भवान्‌लिखति भवाँल्लिखति अनुनासिकान

न २ नुनासिकत्वेन द्विधा यवलास्तत्र सानुनासिक एव लः स्यात् नः सक्छते नांतस्य पदस्य छते परे सागमः

स्यात् राजन्‌चित्रं राजंश्चित्रं भवांस्तनोति सेचक्वा नांतस्य पदस्य शे परे वा चगागमः भवान्‌शूरः भवाञ्छूरः

प्र०न्ट० ३

नवाच्चग्नरः नवाग्नरः ङ्णोर्ह्रस्वाद्द्विः स्वरे ङ्णौ ह्रस्वादुत्तरौ द्विः स्युः स्वरे पदान्ते प्रत्यङ्ङिदं प्रत्यङिदं सु
गण्णिह राजन्निह छः ह्रस्वादुत्तरः छो द्विः स्यात् खसे चपा झसानां झसानां खसे चपाः स्युः तव छत्रं तवच्छ
त्रं कच्छिदीर्घादपि वक्ष्यमं ह्रीच्छः ह्रीच्छः मोऽनुस्वारः मस्यानुस्वारो हसे पदान्ते च तम् हससि तं हससि न
श्चापदान्ते झसे नस्य मस्य चापदान्ते वर्तमानस्यानुस्वारो झसे परे यशान्सि यशांसि पुम्स्यां पुंस्यां य
मां यपेस्य अपदान्ते वर्तमानस्यानुस्वारस्य यमाः स्युर्यपे परे अस्य यपस्य सवर्णाः शान्तः अङ्कितः अपदा
न्ते वर्तमानस्यानुस्वारस्य यमा वा स्युः तं करोति तङ्करोति यवलपरे यवला वा अनुस्वारस्य यवला वा स्युर्य
वलपरे संयंता संय्यंता संवत्सरः संव्वत्सरः यंलोकं यंल्लोकं स्वरे मः अनुस्वारस्य मादेशः स्यात् स्वरे शं अ
स्ति शमस्ति ँ छे दसि छेदस्यानुस्वारो ँ यालि शषसहरेफेषु परतः हंसः हँसः तंह तँह तंरविः
तँरविः इति हससंधिः विसर्जनीयस्य सः विसर्गस्य सः स्यात् खसे परे कः तनोति कस्तनोति शषसे
वा विसर्गस्य सो वा स्यात् शषसे परे कः शेते कश्शेते कः षण्डः कष्षण्डः कः साधुः कस्साधुः कुपोः ᳵकᳶपौ
वा विसर्गस्य कुपुसंबंधिनि खसे परे ᳵकᳶपौ इत्येतौ कपावुच्चारणार्थौ कः करोति कᳵ करोति कः पचति
कᳶ पचति वाचस्पत्यादयः संज्ञाशब्दा निपात्यन्ते साधवः वाचस्पतिः बृहस्पतिः तस्करः इत्याद्या इति
गणः रो रात्रिषु अह्नो विसर्गस्य पदान्ते रः स्यात् न तु रात्र्यादिषु अहः पतिः अहर्पतिः अहरात्रं अहोरात्रं
अहः रूपं अहोरूपं अतो रुः अतः परस्य विसर्गस्य उः स्यात् हसि परतः कः अर्थः कोऽर्थः हवे अतः पर

परे २

३

स्य विसर्गस्य उः स्याद्वे कः गतः कोगतः आद्वे लोपश्च अवर्णात्परस्य विसर्गस्य लोपश्च स्याद्वे परे
देवाः अत्र देवा अत्र स्वरे यत्वं वा विसर्गस्य स्वरे परे यत्वं वा स्यात् देवायत्र भोसः भोस्भगोस् अघोसः
इत्येतस्य विसर्गस्य लोपश्च स्याद्वे भोः एहि भो एहि भगोः नमस्ते भगो नमस्ते अघोः याहि अघो याहि
नामिनो रः नामिनः परस्य विसर्गस्य रेफः स्याद्वे परे अग्निः अत्र अग्निरत्र रेफः प्रकृतिकस्य खपे वा रे
फप्रकृतिकस्य विसर्गस्य खपे वा रेफः स्यात् गीः पतिः गीर्पतिः गीःपतिः रः रेफसंबंधिनो विसर्गस्य रेफो
ऽवे परे प्रातः अत्र प्रातरत्र रिलोपो दीर्घश्च रेफस्य रेफे परे लोपः स्यात् पूर्वस्य दीर्घः पुनः रमते पुनारम
ते हरिः राजते हरीराजते सेषाद्धसे सशब्दादेषशब्दाच्च परस्य विसर्गस्य लोपः हसे परे सः चरति सच
रति एषः हसति एष हसति सशब्दाद्विसर्गस्य लोप एव स्वरे पादपूर्णं चेत् सैष दाशरथी रामः इत्यादौ
बहुलं लौकिकाव्ये हतद्धे दे बहुलं न वेत् सेमां मस्मादः सैषामित्यादीनाम दृष्टता १ बहूर्थं दं ब
हुलं इति विसर्गसंधिः अथ विभक्त्यधिकारः अथ विभक्तिर्नाम विभक्तिर्धातोश्च स्यादर्थे वच्छ ध्रु-
रूपं नामोच्यते कृत्तद्धितसमासाश्च प्रातिपदिकसंज्ञा इति केचित् तस्मात् सिऔजस् अमौश
स् टाभ्यांभिस् ङेभ्यांभ्यस् ङसिभ्यांभ्यस् ङसोसाम् ङिओस्सुप् ७ नाम्नः परास्स्यादिविभक्त
यः स्युः तत्रैकत्वविवक्षायां प्रथमैकवचनं देवसि सिङ्सोरिकारो जश्च टङपाश्चेतः सुः सौ वि
सर्गः सरेफस्यो विसर्गादेशः स्यात् रसे पदांते च देवः द्विवचनविवक्षायां देवौ देवौ बहुत्वविव

अद्द स्यात्०

प्र०न०
४

त्वायां देव जस् जस्येत्वा लोपः दीर्घविसर्गौ देवाः अतो जसोऽसुक् क्वचिद्वक्तव्यः देवासः देव अम् अम्
शसोरस्य समानात्परयोरमशसोरतो लोपः स्यादधातोः देवं देवौ शसि शसि परे पूर्वस्य दीर्घः स्यात्
सो नः पुंसः पुल्लिंगात्समानात्परस्य शसः सस्य नादेशः स्यात् लाम् शसी त्वा त्वे देवान् टेनः अतः परस्य
इनः स्यात् देवेन अद्भि अत आः स्याद्भकारे देवाभ्यां भ्यः अतः परस्य भिसो न स्यादादेशः स्यात् देवैः
अतो भिसि छन्दसि हस्य ऐस् न भ्यः देवेभिः ङेरक अतः परस्य ङे इत्येतस्य यागागमः ए अय दीर्घः देवाय देवा
भ्यां एत्वि बहुत्वे अत एत्वं स्यात् समानादेशे स्याद्देव बहुत्वे सति देवेभ्यः ङसिरत् अतः परो ङसिरत्स्यात् दे
वात् देवाभ्यां देवेभ्यः ङसस्य अतः परो ङस स्य स्यात् देवस्य ओसि अत एत्वं स्यादोसि परे देवयोः नुडा
मः समानात्परस्यामो नुडागमः उच्चारणार्थः नामि नामि परे पूर्वदीर्घः स्यात् देवानां ङि अ इ ए देवे दे
वयोः क्विलात्सः सः कृतस्य कवर्गादिलाद्वस्याहारात्परस्य केन खित्वत्रेण कृतस्य सस्य षादेशः स्या
त् देवेषु सिर्द्धिः आमंत्रणेऽर्थे सिर्द्धिसंज्ञः स्यात् समानाद्धेर्लोपो धातोः ह्रस्वात्समानाद्धेर्लोपः स्यात्
स्यधे लोपः स्यादधातोः आसिमुख्यासि व्यक्तये हेशब्दः प्राक्प्रयोगः हे देव हे देवौ हे देवाः एवं
घटपटरामादयोऽप्यदन्ताः सर्वादेस्तु विशेषः सर्व विश्व उभ उभय अन्य अन्यतर इतर डतर डतम
कतर कतम सम सिम नेम एक पूर्व पर अवर दक्षिण उत्तर अपर अधर स्व अन्तर त्यद् तद् यद् एतद्
अदस् इदम् द्वि किम् युष्मद् अस्मद् एते सर्वादयस्त्रिलिंगाः सर्वः सर्वौ जसी सर्वादेरतः परो जस
ईस्यात् सर्वे सर्वं सर्वौ सर्वान् षुर्नोणोऽनन्ते षकाररेफऋवर्णेभ्यः परस्य नस्य णत्वम् आदेशः स्यादन्ते भिन्नपदे

४

8

वष्यि तस्मन् अवकुर्घं तरेपि अवप्रत्याहारक वर्गप वर्गैर्मध्ये व्यवधानेपि स्यात् अन्येन सर्वेण सर्वाभ्यां
सर्वैः सर्वादेः स्मट् सर्वादेरदंतात्परस्य ङेङत्ये तस्य स्मडागमं सर्वस्मै सर्वाभ्यां सर्वेभ्यः अतः सर्वादेरदंता
त्परस्यातः स्मडागमः सर्वस्मात् सर्वाभ्यां सर्वेभ्यः सर्वस्य सर्वयोः सुडामः सर्वादेरवर्णांतात्परस्यामः
सुडागमः सर्वेषां ङिः स्मिन् सर्वादेरदंतात्परो ङिः स्मिन् स्यात् सर्वस्मिन् सर्वयोः सर्वेषु हे सर्व हे सर्वौ हे
सर्वे एवं विश्वादय एकत्रिंशत्ताः उतरडतमौ प्रत्ययौ तौ तदंता आद्याः पूर्वादीनां नवानां जसङसि
ङीनामीस्मात् स्मिनौ वा क्रमेण पूर्वे पूर्वाः पूर्वस्मात् पूर्वात् पूर्वस्मिन् पूर्वे शेषं सर्ववत् एवं परा
द्वयः प्रथमचरमतयाय अल्पार्द्ध कतिपय नेमानां जसी वा प्रथमे प्रथमाः शेषं देववत् नेमे नेमाः
शेषं सर्ववत् तयायशेषप्रत्ययौ तौ तदंता आद्याः तीयस्य वा ङित्सु सर्ववद्रूपं द्वितीयस्मै द्वितीया
य द्वितीयस्मात् द्वितीयात् द्वितीयस्मिन् द्वितीये एवं तृतीयः उभशब्दो नित्यं द्विवचनांतः उभौ २
उभाभ्यां ३ उभयोः २ उभयशब्दस्यैकवचनबहुवचने स्तः उभयः उभये उभयं उभया नित्या द्विश्वदं
तो मासश्चः मासस्याल्लोपो वा मासश्च हृत्स्था ल्लोपो वा स्यात्स्याद्यसेपरे हसेपः से लोपः हसां नादीवना
द्वयपरस्य सेर्लोपः स्यात् माः मासौ मासः मासं मासौ मासः मासा दोर्विसर्गः आ इवे लोपश्च माभ्यां मा
भिः मासे माभ्यां माभ्यः मासः माभ्यां माभ्यः मासः मासोः मासां मासि मासोः मास्सु हे माः हे मासौ हे मा
सः पदेदेववत् आवंतः सोमपाः शब्दः सोमपाः सोमपौ सोमपाः सोमपां आतो धातोः लोपः धातुसंज्ञ
धिन आतो लोपः स्यात् घसादौ स्वरे सोमपः सोमपा सोमपाभ्यां सोमपाभिः सोमपे सोमपाभ्यां सोमपाभ्यः

प्र०न्०
५

सोमपः सोमपाभ्यां सोमपाभ्यः सोमपः सोमपोः सोमपां सोमपि सोमपोः सोमपासु एवं कीलालपा मधुपा शं
खध्मा प्रभृतिः धातोरिति किं शोषणात् हाहान् इत्यादौ नातो लोपः इदंतो हरिः शब्दः हरिः श्रीयुः इदंतादुदं
ताच्च परस्तो सूर्याति ई ऊ स्तः हरी एऔ जसि इदंतस्योदंतस्य च जसि परे एदोच्चस्यात् हरयः धो इदंतस्योदंत
स्य च धावेदोच्चस्यात् हे हरे हे हरी हे हरयः हरिं हरी हरीन् टानास्त्रियां इदंतादुदंतात् च परस्य टा नास्यात् हरि
णा हरिभ्यां हरिभिः ङिति इदंतस्योदंतस्य च ङिति परे एदोच्चस्यात् हरये हरिभ्यां हरिभ्यः ङसिङ
सोरस्य एदोद्भ्यां परस्य ङसिङसो रस्य लोपः हरेः हरिभ्यां हरिभ्यः हरेः हर्योः हरीणां ङेरौ ङित् इदुद्भ्यां परस्य ङे
रौ स्यात् ङिच्च ङिति टेः ङिति परे टेर्लोपः हरौ हर्योः हरिषु एवमग्निगिरिरविकव्यादयः उदंता विष्णुवायुभा
न्वादयोप्येवं ज्ञेयाः भानुः भानू भानवः भानुं भानू भानून् भानुना भानुभ्यां ३ भानुभिः भानवे भानुभ्यः २ भानोः २
भान्वोः भानूनां भानौ भानो भानुषु हे भानो हे भानू हे भानवः सख्युर्विशेषः सेर्डाधेः सखिशब्दात्परस्य सेरधेर्डा स्या
त् सखा हे सखे ऐ सख्युः आ खिशब्दस्यैकारादेशः स्यात् पंचसु परेषु षष्ठीनिर्दिष्टस्यादेशास्तदंतस्य ज्ञेयः स
खायौ द्विवचनस्यावाछंदसि सखायौ २ सखायः सखायं सखायौ सखीन् सखिना ष्योरीक सखिपत्यो
रीगागमो टाङेङिषु परेषु दीर्घत्वान्नना सख्या आगमजं नित्यं सखिना सख्ये ङसिङसोः सखिपत्योरीगागमो ङ म३
सिङसोरीपरे सख्युः अमङ इति स्थिते ऋतो उ उः ऋदंतात्परस्य ङसिङसोर्ईस्य उस्यात् ङिच्च सख्युः २ ङेरौ ङिदि
त्यौकारे कृते सखिपत्योरीक सख्यौ शेषं हरिशब्दवत् पत्या पत्ये पत्युः २ पत्यौ शेषं हरिवत् पतिः समासे।

५

हरिवदेवमन्यपतिना भूपतये इत्यादि द्विशब्दो नित्यं द्विवचनांतः त्यदादेष्टेरः स्यादौ त्यदादेष्टेरः स्यात् स्यादौ
द्वौ २ द्वाभ्यां ३ द्वयोः २ त्रिशब्दो बहुवचनांतः एतो जसि त्रयः त्रीन् त्रिभिः त्रिभ्यः २ त्रेस्त्रय ३ त्रिशब्दस्य त्रय इत्यादेशो
नामिपरे इदंतस्य वक्तव्यः त्रयाणां त्रिषु कतिशब्दो नित्यं बहुवचनांतस्त्रिषु समरूपः कतिशब्दाज्जस्शसोर्लु
क् लुकि न तन्निमित्तं कति २ कतिभिः कतिभ्यः २ कतीनां कतिषु ईदंतः सुश्रीशब्दः सुश्रीः धीधातोश्रियुवो
स्वरे धातोरिवर्णोवर्णयोरियुवौ स्तः स्यादौ स्वरे सुश्रियौ सुश्रियः हे सुश्रीः सुश्रियं सुश्रियौ सुश्रियः सुश्रि
या सुश्रीभ्यां सुश्रीभिरित्यादि एवं सुधीशब्दः एवमूदंतः स्वयंभूशब्दः सेनानीशब्दस्य विशेषः सेनानीः धीवा
अनेकस्वरस्य नाम्नो धातोरिवर्णोवर्णयोर्यवौ स्तः स्वरे परे धातोरसंयोगः पूर्वो यस्य तु न वा शब्दो दृष्टो भूपुन

नतत्त्व

र्भूव्यतिरिक्तः शब्दः सुधीशब्दश्च यो न सेनान्यौ सेनान्यः सेनान्यमित्यादि सेनान्यादीनां वामो नुड्वक्तव्यः सेना
न्यां सेनानीनां आम्हे नियश्च आवंतानीशब्दाच्च परस्य डेराम् आदेशः स्यात् सेनान्यां सेनान्योः सेनानीषु एवं
ग्रामणीप्रभृतिः ऊदंतो यवलूशब्दः यवल्वौ यवल्वः इत्यादि ऋदंतः पितृशब्दः सेरा ऋदंतात्परस्य सेरा स्यात् डि
द्वसः पिता आपंचसु ऋदरस्यात्वं घुट्स्यादिषु पितरौ पितरः घेरर् ऋदंतात्परस्य घेरर् स्यात् डिद्वसः हे पितः
हे पितरौ हे पितरः पितरं पितरौ पितॄन् पित्रा पितृभ्यां पितृभिः पित्रे पितृभ्यां पितृभ्यः ऋतो उडुः पितुः २ पि
त्रोः २ पितॄणां डौ ऋतो रः स्यात् डौ परे पितरि पितृषु एवं जामात्रादयः नुर्वा नामि दीर्घः नृणां नॄणां शेषं पितृ
वत् कर्तुर्विशेषः स्तुरार् सकारस्तृप्रत्ययसंबंधिन ऋत आर् स्यात् घुट्सु सेरा कर्ता कर्तारौ कर्तारः कर्तारं क
र्तारौ कर्तॄन् शेषं पितृवत् उद्गातृ ननंदृ नेष्टृ होतृ क्षत्तृ त्वष्टृ पोतृ प्रशास्तॄणां च आर् क्रोष्टुशब्दस्य पंचस्व

प्र०म०
६

धिषु तृत्प्रत्ययांतवद्रूपं क्रोष्टा क्रोष्टारौ क्रोष्टारः हे क्रोष्टो क्रोष्टारं क्रोष्टारौ क्रोष्टून् शब्दोस्वरे क्रोष्टुशब्दस्य वा त
वद्रूपं क्रोष्ट्रा क्रोष्टुना क्रोष्ट्रे क्रोष्टवे क्रोष्टुः २ क्रोष्टोः २ क्रोष्ट्रोः २ क्रोष्टोः २ कृताकृतप्रसंगी यो विधिः स नित्यः
नित्यानित्ययोर्नित्यो विधिर्बलवान् क्रोष्टूनां क्रोष्टरि क्रोष्टौ क्रोष्टुषु नाडीभानुवत् ऐकारांतः सुरैशब्दः रैस्त्रि
रैत्राहस्याकारादेशः स्यादौ विभक्तौ परे सुराः सुरायौ सुरायः सुरायं सुरायौ सुरायः सुराया सुराभ्यां सुराभिः
सुराये इत्यादि ओदंतो गोशब्दः ओतो णित् ओत ओस्यात्त्वं च सु गौः गावौ गावः हे गौः आमशसि ओत आत्वं स्यात् अमिश
सि च गां गावौ गाः गवा गोभ्यां गोभिः गवे गोभ्यां गोभ्यः गोः २ गवोः २ गवां गवि गोषु एवं सुद्योशब्दः ओदंतो ग्लौ
शब्दः ग्लौः ग्लावौ ग्लावः ग्लौभ्यामित्यादि इति स्वरांताः पुल्लिंगाः अथ स्त्रीलिंगाः आदंतो गंगाशब्दः आपः आ
बंतात्से र्लोपः गंगा औरी आबंतात्परस्य औ ई स्यात् गंगे गंगाः धिरि आबंतात्परो धिः स्यात् हे गंगे अंबादीनां
धो ह्रस्वः हे अंब हे अक्क गंगां गंगे गंगाः टौसोरे आबंतस्य टौसोः परत एत्वं स्यात् गंगया गंगाभ्यां गंगाभिः ङितां
यट् आबंतात्परेषां ङेङसिङसङीनां यडागमः स्यात् गंगायै गंगाभ्यां गंगाभ्यः गंगायाः गंगाभ्यां गंगाभ्यः गंगा
याः गंगयोः २ गंगानां आमि गंगायां गंगासु एवं श्रद्धामेधाशालामालाप्रभृतिः आबंतः स्त्रियां अदंता नाम्नः
स्त्रियां वर्तमानादाप्प्रत्ययः स्यात् सवर्णे दीर्घः सह सर्वा यदोश्च आबंतात्सर्वादेः परस्य यटः सुडागमः पूर्व
स्यापोऽस्यात् सर्वस्यै सर्वस्याः २ सुडागमः सर्वासां सर्वस्यां शेषं गंगावत् एवं विश्वादयः जरायाः स्वरादौ जर
स वा वक्तव्यः गुरुः (ग्रिद्युसर्वस्य वक्तव्यः) जरा जरसौ जरसः जरसं जरसौ जरसः जरसा जरसे जरसः २ जर
सोः २ जरसां जरसि पक्षे हसादौ च गंगावत् धौ हे जरे इदंतो बुद्धिशब्दः बुद्धिः औयू बुद्धी बुद्धयः हे बुद्धे बु

सिद्धश्री

इदं बुद्धी बुद्धयः स्त्रियां नत्वं बुद्ध्या बुद्धिभ्यां३ बुद्धिभिः इदुद्भ्यां स्त्रियां वर्तमानाभ्यां परेषां ङितामडागमो वा बुद्ध्यै
ङिति बुद्धये बुद्धिभ्यां बुद्धिभ्यः२ बुद्ध्याः२ बुद्धेः२ बुद्ध्योः२ बुद्धीनां स्त्रियां योः स्त्रियां वर्तमानादिवर्णोवर्णान्तात्य
रस्य ङेरामस्यात् बुद्ध्यां अङभावे औमभावः बुद्धौ बुद्धिषु एवं मतिभूतिधृतिप्रभृतयः एवं धेनुरज्जुप्रभृत्युदन्ता
एतैरेव सूत्रैः साध्याः धेनुः धेनू धेनवः हे धेनो धेनुं धेनू धेनूः धेन्वा धेनुभ्यां धेनुभिः धेन्वै धेनवे धेनुभ्यां धेनु
भ्यः धेन्वाः२ धेनोः२ धेन्वोः२ धेनूनां धेन्वां धेनौ धेनुषु ईदूतो नदीशब्दः हसेपः सेर्लोपः नदी नद्यौ नद्यः धो ह
स्वः ईदूतो रधातोः स्त्रियां धोपरे ह्रस्वः हे नदि हे नद्यौ हे नद्यः नदीं नद्यौ नदीः नद्या नदीभ्यां३ नदीभिः ङि
धा० तामट् स्त्रियामीदन्तादूदन्ताच्च ङितामडागमः नद्यै नदीभ्यां२ नदीभ्यः२ नद्याः नद्योः२ नदीनां नद्यां नदीषु
एवं गौरीसरस्वतीब्राह्मणीप्रभृतयः लक्ष्मीशब्दस्यानीवन्तत्वाभावात् सिलोपः लक्ष्मीः लक्ष्म्यौ लक्ष्म्यः हे लक्ष्मि
शेषं नदीवत् स्त्रीशब्दस्यापीवन्तत्वात् सिलोपः स्त्री स्त्रियौ स्त्रीशब्दस्य ह्रस्वो स्त्रियौ स्त्रियः स्वरपरे स्त्रियोऽस्त्रि
यः हे स्त्रि वामशसि अमिशसि च स्त्रियो वा इय् स्यात् स्त्रीं स्त्रियं स्त्रियौ स्त्रियः स्त्रीः स्त्रिया स्त्रीभ्यां३ स्त्रीभिः
स्त्रियै स्त्रियाः२ स्त्रियोः२ नुडेवामि विशेषात् स्त्रीणां स्त्रियां स्त्रि
धु५ वेयुवः ईवन्तात् ङितामडा स्त्रियास्तु नित्यं श्रियै श्रियाः२ श्रियोः२ श्रि
षु भाषेन नदीवत् श्रीः श्रियौ श्रियः हे श्रीः श्रियं श्रियौ श्रियः श्रिया श्रियेः श्रियै श्रियाः श्रियः२ श्रि
याः भ्वादीनां वामोनुड्वक्तव्यः श्रीणां श्रियां श्रियि श्रियां ह्रसादौ स्त्रीवत् एवं धीह्रीप्रभृतयः भ्रूशब्दस्य
वृष्येवं वधूजंब्वादीनां नदीवद्रूपं वधूः वध्वौ वध्वः हे वधु वधूं वध्वौ वधूः वध्वा वधूभ्यामित्यादि ऋ
दन्तो मातृशब्दः पितृवत् माता मातरौ मातरः धेरर् हे मातः शसि मातॄः स्वसृशब्दः कर्तृवत् स्वसा स्व ॥श्री रामः॥

१३

प्र०न०
७

सारो स्वसारः शसि स्वसॄः स्वसा स्वसृभ्यामित्यादि ऐकारांतो रैशब्दः रैवत् गोशब्दः पूर्ववत् नौशब्दः ग्लौवत् इति सुरैशब्दः १
स्वरांताः स्त्रीलिंगाः अथ नपुंसकलिंगाः अदंतः कुलशब्दः अतोम् अदंतान्नपुंसकात्परयोः स्यमोरम्स्या
दधो लुग्वा वत्यर्थम मो ग्रहणं कुलं हे कुल ईमौ नपुंसकात्परयोः औ ईत्वं याति कुले जस्शसोः शिः नपुंसकात्प
रयोः जस्शसोः शिः स्यात् गुहः शिश्च सर्वनामवत्कार्यः नुमयमः नपुंसकस्य नुमागमः शौ परे यमप्रत्याहारांतस्य
नमि दंत्या तु स्वरात्परो वा च्यः उदुच्चारणार्थः नोपधायाः नांतस्योपधायाः दीर्घः शौ पुंसि पंचस्वधि षु नामि च कु
लानि पुनरपि कुलं कुले कुलानि शेषं देववत् एवं फलपत्रादयः स्वस्त्यादि अन्यादेः परयोः स्यमोः स्तुस्यात्
ससर्वादेशार्थः अन्यत् अन्ये अन्यानि पुनरपि अन्यत् अन्ये अन्यानि एवमन्यतर इतरत् कतरत् कत
मत् शब्दाः शेषं सर्ववत् इदंतः अस्थिशब्दः नपुंसकात्स्यमोर्लुक् स्यात् अस्थि घृणां इदुदंतानां नपुंस
के घो वा गुणः हे अस्थे हे अस्थि नामिनः स्वरे नाम्यंतस्य नपुंसकस्य नुमागमः स्यादौ स्वरे अस्थिनी अस्थी
नि २ अस्थ्ना अस्थ्ना शसादौ अस्थ्यादीनां नुमागमः इतश्चात्स्यात् टासादौ स्वरे अल्लोपः स्वरेष्वयुक्ता टासादौ
नांतस्योपधाया लोपः शसादौ स्वरे मांत वांत संयोगात्परस्य नुन अस्थ्ना अस्थिभ्यां अस्थिभिः अस्थ्ने अ
स्थिभ्यामित्यादि वेङ्ग्योः ईङ्ग्योः परयोर्वा अतो लोपः अस्थ्नि अस्थनि अस्थ्नोः अस्थिषु एवं दधिस
क्थि अक्षिशब्दाः इदंतो वारिशब्दः वारि वारिणी वारीणि २ वारिणा वारिभ्यां ३ वारिणे वारिभ्यः २ वा
रिणः वारिणोः २ आमि नुडेव वारीणां वारिणि वारिषु हे वारे हे वारि नपुंसकस्य ह्रस्वः स्यात् ग्रामणि

पा५

६

कुलं ग्रामणिनी ग्रामणीनि २ ॥ टादौ वुक्पुंसकं पुंवद्वा ॥ उक्पुंसकं नाम्यंतं नपुंसकं पुंवद्वा स्यात् टादौ स्व
रे ग्रामण्या ग्रामणिना ग्रामणिभ्यां ग्रामणिभिरित्यादि ग्रामणीनां ग्रामणिनि ग्रामण्यां ग्रामण्योः ग्रामणि
नोः ग्रामणीषु सोमपं कुलं सोमपे सोमपानि २ शेषं देववत् उदंतो मधुशब्दः मधु मधुनी मधूनि २ मधुना
मधुभ्यां मधुभिरित्यादि हे मधो हे मधु एवं खलपु खलपुनी खलपूनि २ ऋदंतः कर्तृशब्दः कर्तृ कर्तृ
णी कर्तॄणि २ कर्त्रा कर्तृणा कर्तृभ्यामित्यादि हे कर्तृ हे कर्तः ऐकारांतो रैशब्दः ह्रस्वादेशो संध्यक्षराणा
मिदुतौ वक्तव्यौ अतरि अतिरिणी अतिरीणि २ अतिरिणा अतिराया पक्षे हसादौ च वा स्त्रीवत् हे अ
तिरि ओदंतो तिनौशब्दः अतिनु अतिनुनी अतिनूनि २ अतिनुना अतिनावा अतिनुभ्यामित्यादि
हे अतिनु ओदंतो उपगोशब्दः उपगु उपगुनी उपगूनि २ शेषं मधुवत् इति स्वरांता नपुंसकलिंगाः अथ
हसांताः पुल्लिंगा हांतो ऽनडुहशब्दः अनडुहश्च पंचसु पुंस्यामागमः स्यात् सावनडुहः अनडुहः सोनु
मागमः संयोगांतस्य लोपः स्यादौ रसे पदांते च हसेपः सेर्लोपः अनड्वान् अनड्वाहौ अनड्वाद्धा
वम् अनडुहो धोपरे अमागमः हे अनड्वन् हे अनड्वाहौ हे अनड्वाहः अनड्वाहं अनड्वाहौ अनडुहः
अनडुहा वसांरसे दः वसुस्रंसुध्वंसनडुहो दः स्वस्या द्धातोर्र्थ सेपरे नाम्न्यश्च रसे पदांते च अनडुह्भ्यां
अनडुहि इत्यादि हांतो गोदुहशब्दः दादेर्घः दादेर्धातोर्हस्य घः स्वस्या द्धातोर्र्थ से नाम्न्यश्च रसे पदां
ते च गोदुघसि इति स्थिते आदिजबानामाद्यंतस्य झभान्ता द्धोः धातोर्र्थ नां तस्यादौ वर्त्तमानानां जबा

ति

घरे २

प्र०न०
८

नांझनाः सुः सध्वयोर्नाम्नश्च रसे पदांते च वा वसाने अवसाने वर्त्तमानानां झसानां जबाः सुश्च पा वा गोधु
क् गोधुग् गोदुहौ गोदुहः हे गोधुक् नादेरादेर्घः आदिर्जबानामिति घत्वं झबे जबाः गोधुग्भ्यामित्यादि सुपि
खसे चपा झसानां क्षिलोप्यः स छुः तस्येति षत्वं कषसंयोगे क्षः गोधुक्षु हांतो मधुलिहश्च ढः होढः धातोर्हस्य
ढत्वं धातोर्झसे नाम्नश्च रसे पदांते च मधुलिड् मधुलिट् मधुलिहौ मधुलिहः हे मधुलिड् २ मधुलिड्भ्या
मित्यादि मधुलिट्सु मित्र द्रुहो नेदः द्रुहादीनां घत्वढत्वे वा स्तः मित्रध्रुग् मित्रध्रुक् मित्रध्रुड् मित्र
ध्रुट् मित्रद्रुहौ मित्रद्रुहः मित्रद्रुहा मित्रध्रुग्भ्यां मित्रध्रुड्भ्यामित्यादि खसे चपा झसानां मित्रध्रुट्सु मि
त्रध्रुत्सुः तत्त्वमुग् तत्त्वमुक् तत्त्वमुड् तत्त्वमुट् तत्त्वमुहौ तत्त्वमुहः तत्त्वमुहं तत्त्वमुहौ तत्त्वमुहः तत्त्व
मुहा तत्त्वमुग्भ्यां तत्त्वमुड्भ्यामित्यादि रांतस्य तु रस्य शो बहुवचनांतः चतुराम्शौ च चतुरः सुस्सा
माझगमः पंचसु परे षः शौ च चत्वारः चतुरः चतुर्भिः चतुर्भ्यः २ रः संख्यायाः रांत संख्यायाः परस्यामो नुड
गमः स्यात् चतुर्णां चतुर्षु य क्षः चतुर्ष्विति लोप कात्वरस्य विसर्गः पंचस्विति गौणत्वे प्रियाश्चत्वारो य
स्यस प्रियचत्वाः प्रियचत्वारौ प्रियचत्वारः प्रियचत्वारं प्रियचत्वारौ प्रियचतुरः प्रियचतुरा प्रियच
तुर्भ्यां ३ प्रियचतुरे प्रियचतुर्भ्यः २ प्रियचतुरः २ प्रियचतुरोः गौणत्वे नुट् न प्रियचतुरां प्रियचतुर्षु ॥
नो लो राजन् झस्रा द्वः नोपधायाः नाम्नो नो लोपश्शधौ नांतस्य नाम्नो नस्य नागमस्य लोपः शस्यादयोः रसे पदां
ते च राजा राजानौ राजानः हे राजन् राजानं राजानौ अल्लोपः स्वरे झस्य ल्लोपः स्नोश्च भिः स्थु रिति नस्य जः ज

७

ज्ञो र्ज्ञः राज्ञः राज्ञा राजभ्यां नलोपश्चेन विभक्तिकार्यं पंचस्विति लोपकात् राजभिः राज्ञे राजभ्यः२ राज्ञः२
राज्ञोः राज्ञां राज्ञि राजनि एवं यज्वन्नश्मन्प्रभृतयः मंत्रयुक्तादलोपो न यज्वनः यज्वा यज्वभ्यामित्या
दि श्वन्युवन्मघवन्नित्येते पंचसु राजनवत् श्वादेः श्वादेर्व उत्वं यातिशसादौ स्वरे तद्धिते ईपि ति च शुनः श्वना
श्वभ्यामित्यादि युवन् तृतीयाद्येकवचने व उत्वे कृते दीर्घः यूनः यूना युवभ्यामित्यादि मघवन् तृतीयाद्येकवचने उत्वे उ ओ म
घोनः मघोना मघवभ्यामित्यादि पथिन् तृतीयाद्येकवचने दः इतोऽत्पंचसु पंचसु पथ्यादीनामितो ऽत्स्यात् थो नुट् पथ्यादी
नां थस्य नुडागमः पंचसु आशो पथ्यादीनां टेरा स्वे सौ परे पंथाः पंथानौ पंथानः हे पंथाः पंथानं पंथानौ पथः टे
पथ्यादीनां टेर्लोपः असादौ स्वरे पथः पथा पथिभ्यामित्यादि एवं मथिन् ऋभुक्षिन् शब्दौ दंडिनि दः इनांशो
सौ इन्हन्पूषन्नर्यमन् एषां शौ सौ च धौ परे उपधाया दीर्घः दंडी दंडिनौ दंडिनः हे दंडिन् दंडिनं दंडिनौ दंडिनो
दंडिनः दंडिना दंडिभ्यामित्यादि ब्रह्महा ब्रह्महणौ ब्रह्महणः हे ब्रह्महन् ब्रह्महणं ब्रह्महणौ हनो घ्नि हंते
ह्रस्वघत्वं स्यात् स्वरे ञिणिति चपसंयोगेण त्वेन ब्रह्मघ्नः ब्रह्मघ्ना ब्रह्महभ्यामित्यादि पूषा पूषणौ पूषणः पू
षणं पूषणौ पूष्णः पूष्णा पूषभ्यां पूषभिरित्यादि पूष्णो ङौ ङिलोपो वा पूष्णि पूषणि अर्यमा अर्यमणौ
अर्यमणः अर्यमणं अर्यमणौ अर्यम्णः अर्यम्णा अर्यमभ्यां अर्यमभिरित्यादि संख्याशब्दाः पंचन् प्रभृत
यो बहुवचनान्ता स्त्रिषु सरूपाः जश्शसोर्लुक् षांत नांत संख्यायाः परयोः जश्शसोर्लुक् स्यात् पंच२ पंच-
भिः पंचभ्यः२ ष्णः षांत नांत संख्यायाः परस्यामो नुडागमः उपधाया दीर्घः नस्य लोपश्च पंचानां पंचसु एवं

१०७०
ले

मध्वन्तं वत्प्रभृतिः अष्टनो डौ अष्टन् आ ड्डा जस्शसोर्वा डौ अष्टौ २ अष्ट २ वासु अष्टन आत्वं वा स्त्री हलादिवि
भक्तिषु अष्टभिः अष्टाभिः अष्टभ्यः २ अष्टाभ्यः २ अष्टानां अष्टसु अष्टासु मांत इदम् शब्दः इदमो यं पुंसि
इदमः सुस्य यमस्यात्सौ परे अयं त्यदादेरेत्वं इदमः त्यदादीनां इदमत्वं स्यादौ परे इमौ इमे त्यदादीनां
घेरर नावः इमं इमौ इमान् अनटौसोः इदमो नादेशो टौसोः परयोः अनेन भ्याः हल्स्य इदमः सत्नयोः पर
योरः स्यात् आभ्यां भिस् भिस् इदम दसो भिस भिसैवस्यात् एहि बहुत्वे एभिः अस्मै आभ्यां २ एभ्यः २ अ
स्मात् अस्य अनयोः २ एषां अस्मिन् एषु किमस्य त्यदादेरेत्वे कृते सर्ववद्रूपं कः कौ के कं कौ कानि त्या
दि धांतस्य त्वं बुधशब्दः आदि जवानामिति नः वावसाने तत्वं तुत् तत्वं तुद् तत् त्वबुधौ तत्वबुधः देत त्वनु
तर तत्वं नुड्ढा तत्वं तुत्सु जातः सम्राज् शब्दः छ शषराजादेः षः छांतनशांतषांतानां राजयजमृजमस्जभ्रा
जादेश्च षः स्याड्डा तोऽफ से परे नाम्नश्च रसेपदांते च षसपत्वं द्वेषी स्यादौ डत्वं निषेधार्थः षो डः षस्य ड त्वं
धातोर्फ से नाम्नश्च रसे पदांते च संम्राट् संम्राड् सम्राजौ सम्राजः इसं म्राट् २ सम्राड्भ्यां मित्याद्वि एवं वि
राजा द्यः दांतानामदन्त द पुर् एत इशाशा स्तेषां त्यदादेरेत्वे कृते सर्ववद्रूपं नः त्यदादेस्तस्य सत्वं स्यात् त्यो
भ्यः त्योत्यैः सः तौ तेः यः यौ ये एषः एतौ एते एतदो न्वादेशो द्वितीयाटोस्स्वेनो वा वाच्यः उक्तस्य पुनर्भाषणम
न्वादेशः यथा अनेन व्याकरणमधीतं एनं छंदोध्यापय एतं एनं एतौ एनौ एतान् एनान् एतेन एनेन एतयोः २
एतेषु छांतनत्व तत्वप्राछ् शब्दः तत्वप्राट् तत्वप्राड् तत्वप्राछौ तत्वप्राछः देत तत्वप्राट् २ तत्वप्राछं तत्वप्रा

ले

सू२

छ्रोत त्वषाढः तत्वषाड्भ्यामित्यादि थांतोऽग्निमथशब्दः अग्निमत् अग्निमद् अग्निमथौ अग्निमथ्यामि-
त्यादि चांतः प्रत्यच्शब्दः अंचेः पंचे नुमवक्रुव्यः प्रत्यन् च सिद्धलिजाते लोपेऽष्टुलिःष्टुरिति नस्य नः संयोगांतस्य
लोपः चोः कुः चवर्गस्य कवर्गादेशो धातोर्ऽसे नाम्नश्चात्सेपदांते च प्रत्यङ् प्रत्यञ्चौ प्रत्यञ्चः प्रत्यञ्चं प्रत्यञ्चौ ॥
अंचेर्लोपो दीर्घश्च अंचेरस्य लोपः पूर्वदीर्घश्च शसादौ स्वरे तद्धिते ई पीति च प्रतीचः प्रतीचा प्रत्यग्भ्यामित्यादि
सुपि प्रत्यक्षु तिर्यङ् तिर्यञ्चौ प तिरश्चादयः निपात्यंते शसादौ स्वरे तद्धिते ई पीति च तिरश्चः तिरश्चा तिर्यग्भ्या
मित्यादि सुपि तिर्यक्षु उदङ् उदञ्चौ प उदीचः उदीचा उदग्भ्यामित्यादि सुपि उदक्षु सम्यङ् सम्यञ्चौ प समीचः
समीचा सम्यग्भ्यामित्यादि सुपि सम्यक्षु सध्र्यङ् सध्र्यञ्चौ प सध्रीचः सध्रीचा सध्र्यग्भ्यामित्यादि सुपि सध्र्यक्षु
तांतो मरुत्शब्दः मरुत् मरुद् मरुतौ मरुतः मरुता मरुद्भ्याम् मरुत्सु ऋदिच्छ्वितु वर्तते तांत उदनुबंधो महच्छ-
ब्दः ऋवितो नुम् उदनुबंधस्य ऋदनुबंधस्य च नुमागमः पुंसि पंचसु सं महतो धोर्दीर्घः शौ च संतस्याप्शब्द
स्य महतश्च दीर्घः स्यात् पंचस्वधिपुंसो च परे महान् महांतौ प हे महन् महतः महता महद्भ्यामित्यादि उद
नुबंधो नवच्छब्दः अत्वसोः सौ अत्वंतस्यासंतस्य चाधोः सौ दीर्घः स्यात् नवान् नवंतौ नवंतः हे नवन् नव
त्सु ऋदनुबंधो नवच्छब्दः अस्य नुमागम एव न दीर्घः नवान् नवंतौ नवंतः एवं पचच्छब्दः शांतो विश्श
ब्दः छ्षशराजादेरिति षः विट् विड् विशौ विशः ड्भ्यामित्यादि षांतः षष्शब्दो बहुवचनांतः षट् षड् षड्भिः ष
ड्भ्यः २ ष्णः ड्लिनुट् षोडः ड्लिट्त्वं ष्टुनाम् इति जाते डः ड्णः स्यान्नामि परे षण्णां षट्सु क्वचित्पदा
ते पिपठीः तता वलं यो यांतो दोष्शब्दः दोषां दोष्संयुक्त पाठ इह विषप्रभृतीनां नामस्य रेफो ऽसेपदांते च

२८

प्र०र१०
१०
दसि आ ते २

दोः दोषौ दोषः शसादावनंततावावाम्यां। दोष्णः दोषः दोष्णा दोषा दोर्भ्यां दोषभ्यामित्यादि सजुषाशिषोरसिपदां
तेवदीर्घः सजूः सजुषौ सजुषः सजूर्भ्यामित्यादि सांतः पुंसशब्दः पुंसोसुङ् पुंसोसुङादेशः स्यात् सर्वसुपरेषु ८ हे तत्र स्य
वक्तव्यः उत् नुमार्थः पुमस सि स्थिते नुम् संमहतोधोदीर्घः संयोगांतलोपः पुमान् पुमांसौ २ हे पुमन् पुंसः पुंसा पुं-
भ्यामित्यादि असंनवे पुंसः ककसोऽसंनवेथे पुंसः कगागमः सुपिपरे स्कोराद्योश्च संयोगाद्योः सकयोर्लोपो धातो
ऋसे नाम्नश्च रसेपदांतेव पुंसु अन्यत्र पुंसु एवं विद्वस्शब्दः विद्वान् विद्वांसौ हे विद्वन् वसोर्वउ वसोर्वउत्वं यादि।
ग्रसादौ स्वरे तद्धिते ई पीतिव विदुषः विदुषा वसांरसेदः विद्वद्भ्यां विद्वत्सु सुवद्वसोमा विति दीर्घः सुवद्वाः सुवद्वसो ग्लवे सा६
हे सुवद्वः ३ सुवद्भ्यो स्यामित्यादि एवं दमसशब्दः उसनसो नेदः उसनसा उसनसपुरुदंससनेहसां सेरधेऽस्या
तु उसना उसनसौ उसनसो धोनात ताअंत नामांतनावावाच्या हे उसनन् हे उसन हे उसनः हे उसनसौ हे उसनसः
उसनो स्यामित्यादि अदसस्यदादेशे त्यत्वं सौसः सौपरे अदसोदस्यसः स्यात् सेरौ अदसः सेरौदादेशः असौ।
दस्यमः मादू अदसोमात्परयोः ह्रस्वदीर्घयोः क्रमादुदूतौस्तः अमू जसी अड्डए एरीबहुत्वे बहुत्वेस्यदसएत ई
स्यात् अमी अमुं अमू अमून् मत्वेऽत्वे कृते टानाभ्रियां अमुना अङ्गि मादू अमूभ्यां ३ अमीभिः अमुष्मै अमी
भ्यः २ अमुष्मात् अमुष्य ओष्पत्वे अयादेशे च कृते मादू अमुयोः २ अमीषां अमुष्मिन् अमीषु सामान्ये दसः
कः स्यादि वा च्वः साधारणेऽर्थे दसः परः कः प्रत्ययः स्यात् तस्य टिवञ्चसः असुकः सर्ववत् इति दसांताः पुल्लिंगाः अ
ह्रीलिंगाः हांत उपानह्शब्दः नहोधः नहोहस्य धादेशो रसेपदांतेव उपानत् उपानद् उपानहौ हे उपानत् उपा
नड्भ्यामित्यादि वांतो दिवशब्दः दिव औ सौपरे दिवो वस्यौ स्यात् द्यौः दिवौ दिवः हे द्यौः वामि दिवो वस्योत्वं वा स्या
द् [illegible] द्यां दिवं दिवौ दिवः दिवा उरसे दिवो वस्यो त्वं स्यात् उरसे द्युभ्यामित्यादि त्रिचतुरोः स्त्रियां तिसृ चतसृ वत्

१०

रूपं स्यात् ऋतोरू तवृत अतः स्तुरा रि लिनन्नतस्त्रः २ चतसृभिः चतसृभ्यः २ न तिसृचतसृणोर्नामि दीर्घः चतसृणां चत-
सृषु एवं तिसृशब्दः रांतो गिरशब्दः स्वोर्धिहसे धातो रि दुलो दीर्घः स्यात् रवयोर्हसपरयोः पदांते च गीः गिरौ गिरः गिरं २
गीर्भ्यामित्यादि एवं पुरधुरादिः धांतः समिधशब्दः समित् समिद् समिधौ हे समित् २ समिद्भ्यामित्यादि भांतः ककु-
भशब्दः ककुप् ककुब् ककुभौ हे ककुप् २ क[कु]ब्भ्यामित्यादि त्यदादीनां टेरत्वे कृते आबंतः स्त्रियां सर्ववद्रूपं स्या।
त्ये त्याः सा ते ताः या ये याः एषा एते एताः का के काः इयं स्त्रियां इदमः स्त्रियामियं स्याल्लोपरे इयं इमे इमाः इमां इमे इमाः
अनया आभ्यां ३ आभिः अस्यै आभ्यः २ अस्याः २ अनयोः २ आसां अस्यां आसु चांतस्त्वचशब्दः चोः कुः वावसाने त्व-
क् त्वग् त्वचौ त्वचः एवं ऋच् वाच् स्रज् प्रभृतिः अपशब्दो बहुवचनांतः संमहत इति दीर्घः आपः अपः भिदपां अपशब्द-
स्य दत्वं स्याद्भिपरे अद्भिः अद्भ्यः २ अपां अप्सु शांतो दिशशब्दः दिशां दिश दृश स्पृश इत्यादीनां स्यादौ रसे पदांते च कु-
त्वं स्यात् दिक् दिग् दिशौ हे दिक् २ दिग्भ्यां दिक्षु षांतो त्विषशब्दः षोडः त्विट् त्विड् त्विषौ त्विड्भ्यामित्यादि आ-
शीः आशिषौ आशीर्भ्यामित्यादि अदसः सावविशेषः असो टेरत्वं दस्य मः आबंतः स्त्रियां मादू अमू अमूः टेसोरे
मादू अमुया अमूभ्यां ३ अमूभिः अमुष्यै अमूभ्यः २ अमुष्याः २ अमुयोः अमूषां अमुष्यां अमूषु इति हसांताः स्त्री-
लिंगाः अथ नपुंसकलिंगाः रांतो वारशब्दः नपुंसकात् स्यमोर्लुक् वाः वारी वारि २ वारा वार्भ्यामित्यादि चतुराम्
णोचेत्याम् चत्वारि २ शेषं पुंवत् नांतोऽहन्शब्दः अह्नः सः अह्नो नस्य सः स्यात् रसे पदांते च अहः वेञोः अह्नी अ-
हनी २ अह्ना अहोभ्यां ३ अहोभिः अह्ने अहोभ्यः २ अह्नः २ अह्नोः २ अह्नां अह्नि अहनि अहस्सु नांतो ब्रह्मन्श-
ब्दः ब्रह्म ब्रह्मणी ब्रह्माणि २ ब्रह्मणा ब्रह्मभ्यामित्यादि एवं चर्मन् वर्मन् प्रभृतिः नांता द्दंताच्च षष्ठे ङसि ङिस्योर्वा।

१४
न

21

प्र० म०
११

लोपः परमे व्योमन् नपुंसके व्योम्नि सर्वनामानि छान्दसत्वाद्देवनलोपो दीर्घानि इति सिद्धं त्यत् त्यद् त्ये त्यानि २ तत्
तद् ते तानि २ यत् यद् ये यानि २ एतत् एतद् एते एतानि २ किं के कानि २ इदं इमे इमानि २ शेषं पुंवत् चोः कुः प्रत्य
क् प्रत्यग् प्रतीची प्रत्यञ्चि २ जगत् जगद् जगती जगन्ति २ जगता जगद्भ्यामित्यादि महत् महद् महती महान्
ति २ एवं सान्ताः पयस् तेजस् प्रभृतयः पयः पयसी पयांसि २ पयसा पयोभ्यां ३ पयोभिः पयसे पयोभ्यः २ पयसः २ प
यसोः २ पयसां पयसि पयस्सु तेजः तेजसी तेजांसि २ वचः वचसी वचांसि २ अदसः स्यमोर्लुकि सोर्विसर्गः अदः
देरत्वमत्वं च इमो अदूं अमू २ अमूनि २ शेषं पुंवत् इति हसान्ता नपुंसकलिङ्गाः अथ युष्मदस्मदो
स्त्रिषु समो त्वमहं सिना सिसहितयोः युष्मदस्मदोः त्वमहमेतावादेशौ स्तः क्रमेण त्वं अहं युवावौ द्विवचने
युष्मदस्मदोः द्विवचने युवावौ स्तः आमौ युष्मदस्मद्भ्यां परस्यौ आमं युवां आवां यूयं वयं जसा जसा सहित
योः युष्मदस्मदोः यूयं वयमेतौ स्तः यूयं वयं त्वमहावेकत्वे युष्मदस्मदोः त्वमत् एतावादेशौ स्तः एकत्वे ग
म्यमाने आमस्तो युष्मदस्मदोः शेरा त्वं सादमिसिपरे त्वां मां युवां आवां त्वदादौ त्वे ... शसि ति
दीर्घः शसो नो वक्तव्यः युष्मान् अस्मान् एटाड्यो युष्मदस्मदोः टेरेत्वं टाड्योः परयोः त्वया मया युवाभ्यां
आवाभ्यां ३ युष्माभिः अस्माभिः तुभ्यं मह्यं ङया ङे सहितयोः युष्मदस्मदोः तुभ्यं मह्यमेतौ स्तः तुभ्यं मह्यं
भ्यस अभ्यम् युष्मदस्मद्भ्यां परो भ्यस् अभ्यम् स्यात् ओ नादित्वव्यावृत्त्यर्थः तेनात्वेत्वेन युष्मभ्यं अस्मभ्यं
ङसिभ्यसोः अत् तु पञ्चम्याः ङसिभ्यसोः अत् स्यात् शालसवादेशः त्वत् मत् युष्मत् अस्मत् तव मम ङसा ङसा

स्यात्

११

सहितयोर्युष्मदस्मदोस्तवममरातोस्तः तवमम युववयोः आवयोः २ सुडामः साम्राकं युष्मदस्मद्भ्यांपरः
सामाकंस्यात् युष्माकं अस्माकं त्वयिमयि युष्मासु अस्मासु युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्विस्तेमेवां
नौवस्नसौ युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयासहितयोर्यथासंख्येनामी आदेशाः स्युः तत्रैकवचनेनसह
तेमेद्विवचनेनसह वांनौ बहुवचनेन वस्नसौ त्वामामा अमासहितयोर्युष्मदस्मदोस्त्वामाएतोस्तः विष्णु
स्त्वावतुमायीह दत्तात्तेमेप्यसौ गतिं तन्यात्तेमेपि शर्माणि पातु वांनौस ईश्वरः १ मोत्वं वांनो दद्रात्वायः पति
वामपि नोहरिः पायाद्वो नः सुखं वो नो देयात्सेव्यो हि वः स नः २ नादौ वा वाक्यादौ पादादौ वर्तमानयोर्युष्मद
स्मदोर्नैते आदेशाः त्वांपातु मांतु वेदैरशेषैः संवेद्यो स्मान्क्षमः सर्वदावतु संबोधनपदात्परानैते आ
देशाः हेराम तवदासोस्मि विशेष्यपूर्वादितरपूर्वात्संबोधनपदात्परयोर्हेतयोरेते आदेशाः स्युः हरेकृ
पालोनः पाहि सर्वदा रक्षितदेवनः चादिनिषेध वा चादिनिर्योगेनैते आवयोर्युवयोष्णैशो हरिर्मामेवर
क्षतु चादिर्निपाताः च वा ह अह एव एवं नूनं पृथक् नाना विना स्वस्ति दोषानक्तं मृषा मिथ्या मिथस् अथ
अथो अहो ह्यस् प्रायस् उच्चैस् नीचैस् स्वर् अन्तर् पुनर् नयस् आहोस्वित् उत अपि सह कृते अंतरेण अं
तरा नमस् अलं कृतं अमा नो ना प्रति घेघे ईषत् किल खलु वै आरात् दूरात् नक्तं सामि चिरं मनाक् इत्या
दि स्वराद्य निपाताः स्युः तत्रादिर्गणो विभक्त्यर्थे निपात्यते तस्मिन्निति तत्र अस्मिन्निति अत्र यत्र कुत्र
तेनप्रकारेण तथा कथं इत्थं तस्मादिति ततः कुतः यतः अतः इतः सार्वविभक्तिकस्तसिल्त्वे केआ

प्रातर्
१८

५०न्०

१२ | ना४ | ८०

द्वितः मध्यतः अंततः उभयतः त्वतः मतः पूर्वस्मिन्निति पुरस्तात् अधस्तात् उपरिष्टात् किंसामान्येऽपि दा। निर्वासाद्या सुखी कीर्ति हि॥छ॥
दिः कश्चित् कश्चन् कश्चित् कश्चन तदधीनं तत्कार्ये योर्वा स्यात् राजाधीनं राजसात् सर्वं भस्मन् भस्मसात्
आहि च दूरे दक्षिणाहि वसंति चांडालाः उर्युररी गी करणे उरी कृत्यं उररी कृत्य मद्य आदिः कालेनिपा
त्यंते मद्य अद्य अद्येद्युः इदानीं तस्मिन् काले तदा यदा कदा सपदि सांप्रतं संप्रति ऊट्टति तूर्णं आशु शीघ्रं
पूर्वेद्युः परेद्युः तर्हि यर्हि कर्हि एतर्हि प्रादिरुपसर्गाः प्र परा अप सम् अनु अव निस् निर् दुस् दुर् अभि
वि अधि सु उद् नि प्रति अपि अति परि उप आङ् आविर् इत्यादि प्रयोगधातोः उपसर्गधातोः प्राक् प्रयोक्त
व्याः तद्धर्मं चादिरव्ययसंज्ञः स्यात् क्त्वायंतं त्वाकाय तुमणामश्चि इत्याद्यंतं चाव्ययसंज्ञं अव्ययाद्वि
भक्तेर्लुक् नत्वाशू निर्देशो यथा उद्धिस्यांतपः लिंगविभक्तिवचनेषु समं व्ययं च न याति तदव्ययं भागु
रिमतेरवाप्योरल्लोपो हसांतानामाप् च अव गाहः वगाहः अपिधानं पिधानं वाचा निशा दिशा अथ
स्त्रीप्रत्ययाः आवतः स्त्रियां जाया माया मेधा धारा इत्यादि अजाद्यष्टाप् अजा एडका कोकिला मूषागणि
का अश्वा चटका मूषिका बाला इत्यादि कात्पतः कापिपरे पूर्वस्यात् इस्यात् कारिका पाचिका पाठि
का ह्रस्वो वा कापितरादौ वपरे ह्रस्वो वा वेणिका वेणीका नदिका नदीका श्रेयसितरा श्रेयसीतरा श्रेय
सितमा श्रेयसीतमा वा ग्रहणादेव संध्यक्षराणां गोका नौका ऋन ईप् नांता ऋदंता दंतात् च स्त्रियामीप
स्यात् दंडिनी मघोनी शुनी कर्त्री यस्य लोपः इवर्णे वर्णयोर्लोपः स्यात्तद्धिते स्वरे यकारे ईपि च औपगवी
रौं द्री ईप्यनो लोपः राज्ञी द्विताः षकारटकारऋकारानुबंधात् स्त्रियामीप् नराकी कुरुचरी गोमती पचंती

१२

×पादोवाईप् द्विपदी द्विपात् ×५

नदादेः स्त्रियामीप् नदी गौरी गोतमी सोपर्णेयी आह्निकी इत्यादि इंद्रादेरानीप् इंद्राणी भवानी वरुणा
नी सर्वाणी इत्यादि मातुलोपाध्यायक्षत्रियाचार्याद्वा मातुलानी मातुली उपाध्यायानी उपाध्यायी क्ष
त्रियाणी। क्षत्रिया आचार्यादणत्वं आचार्यानी आचार्या हिमारण्ययोर्महत्वे महद्धिमं हिमानी महद
रण्यं अरण्यानी यवनाल्लिप्यां यवनानां लिपिः यवनानी ईस्समाहारे गुणश्च त्रयाणां समाहारस्त्रयी पुंयो
गे च ईप् प्रष्ठस्य स्त्री प्रष्ठी गणकस्य स्त्री गणकी जातेरयोपधात् जातिवाचिनो योपधाददन्तात्स्त्रियामी
प् स्यात् महिषी हंसी ब्राह्मणी योपधात्तु क्षत्रिया वैश्या प्रथमवयोवाचिनो नत ईप् वाच्य कुमारी किशोरी
प्रथमवयग्रहणात् वृद्धा अकुग्रहणात् शिशुः स्वांगाद्वा स्वांगवाचिनो वा स्त्रियामीप् सुमुखी सुमुखा सुके
शी सुकेशा वाग्रहणाद्बहुपमेवदना इत्यादौ न क्वचित् कारादस्त्रेरीप् वा अंगुली अंगुलिः धूलिः धूली
अक्ते रितिविशेषणात् रतिः कृतिः एवमन्यत्र मन्वादेर्गणात् स्त्रियामीप्स्यादेदादेशश्च वा मनोरौ वा
मनायी वृषाकपायी अग्नायी पत्न्यादयो निपात्याः पत्नी सपत्नी सखी अई जरती प्राची प्रतीची इ
त्यादि क्वचिद्वा निपातादीप् दृढपतिः दृढपत्नी वृषलपतिः वृषलपत्नी इत्यादि दारशब्दो बहुवचनां
तः पुल्लिंगः दाराः दारान् दारैः दारेभ्यः २ दाराणां दारेषु वोर्गुणात् उदंता गुणवाचिनो वा स्त्रियामी
प् पट्वी पटुः मृद्वी मृदुः उतरू उदंतादूङ्प्रत्ययः पंगूः वामोरूः यूनस्तिः युवन्शब्दात् स्त्रियां तिप्र
त्ययः युवतिः अथ विभक्त्यर्थाः लिंगार्थे प्रथमा नामार्थमात्रे प्रथमा स्यात् नियतोपस्थितिको नामा

पत्न्यादीप

त्ते

प्र०न०
१३

र्थः कृष्णः श्रीः ज्ञानं दारी द्रोणः आढकं ग्रामं गोव अभिमुखी करणे च प्रथमा हे देव हे देवौ हे देवाः भवदृगण
वदयवतां भोस् नद्योस् अघोस् एते निपाताः अघो नो हरे नगो नमस्ते अघोयाहि शेषाः कार्यकर्तृसाधनयोर्हो नया
न्वविश्लेषा वधो संबंध आधारत्ना वयोः द्वितीयाद्याराश्चर्थे सुसुः कर्यकर्मकारके द्वितीया स्यात् तच्चतुर्विधं उत्पा
द्यमाप्यं संस्कार्यं विकार्यं च कटं करोति कारू कोरहूपं पश्यति चात्तुषः राज्यं प्राप्नोति धर्मिष्ठः सोमं सुनोति सोम
पाः १ कर्तरि करणे च तृतीया छिन्नः शरेण रामेण रावणः दानपात्रे संप्रदानकारके चतुर्थी वेदविदे गां ददा
ति विश्लेषावधौ पंचमी विश्लेषो विभागस्तस्यावधौ अपादानकारके पंचमी हिमवतोवतरति गंगा धावतो
ऽश्वात् पतति संबंधे षष्ठी राज्ञः पुरुषः आधारे सप्तमी औपश्लेषिकः सामीपिको नैव्यापको वैषयिको नैमित्तिक
औपचारिकश्चेति षोढासः कटे शेते कुमारो सो वटे गावः सुशेरते तिलेषु विद्यते तैलं हृदि ब्रह्मामृतं परं यु
द्धे संनह्यते धीरो गुल्फाग्रे करिणां शतं १ क्रियालक्षणे भावे सप्तापि सप्तमी वर्षति देवे चोर आयातः गोषु
दुह्यमानासु गतः विना सह नमः कृते निर्धारणस्वाम्यादि निश्चरीते रपि योगे द्वितीयाद्याः सुः विनायोगे
द्वितीया विनापापं सर्वं फलति अंतरेण हरिं किं जीवितेन अन्तरा त्वां मां हरिः अभितो ग्रामं नदी वहति सर्व
तो ग्रामं वनं धिग्जाल्मं उपर्युपरि पर्वतो वृक्षाः अध्यधि सुखं दुःखं एवमनुभवतः परितः समया निकषा
प्रत्ययोगेपि कालाध्वनोरत्यंतसंयोगे मासमधीते क्रोशं पर्वतः सहार्थयोगे तृतीया सह शिष्येण गतो गुरुः
एवं साकं सार्द्धं समं योगेपि येनांगविकारः येनांगेन विकृतेनांगिनो विकारो लक्ष्यते तत्र तृतीया अक्ष्णा का
णः कश्चित् प्रकारप्राप्तस्य लक्षणेपि जटाभिस्तापसः तुल्यार्थयोगेपि कृष्णेन तुल्यः रामेण सदृशाः नम आदि

याप

मौ

१३

योगे चतुर्थी नमो नारायणाय स्वस्ति राज्ञे सोमाय स्वाहा पितृभ्यः स्वधा एवमलं वषड्योगेपि कृष्णाय दिव्यो
गोपि क्रूराय क्रुध्यति मित्राय द्रुह्यति गुणवते असूयते ऋते आदियोगे पंचमी ऋते ज्ञानान्न मुक्तिः अन्यो
गृहाद्विहारः आराद्वनात् इतरो रामात् ब्रह्मणः प्रजाः प्रजायंते आङादियोगेपि आमुक्तेः संसारः हेतोस्तृ
तीयापंचम्यौ जाड्यात् जाड्येन वा बद्धः क्रियागुणजातिसंज्ञाभिः समूहात् पृथक्करणं निर्द्धारणं यतस्त
तः षष्ठीसप्तम्यौ क्रियापराणां क्रियापरेषु वा नागवदाराधकः श्रेष्ठः गवां गोषु वा कृष्णा बहुक्षीरा नृणां
नृषु वा ब्राह्मणः श्रेष्ठः छात्राणां छात्रेषु वा मैत्रः पटुः स्वाम्यादियोगे षष्ठीसप्तम्यौ गवां गोषु वा स्वामीप
तिरीश्वरः दायादो वा अनादराधिक्ये क्रियालक्षणे षष्ठी कर्तरि कार्ये च षष्ठीसप्तम्यौ रुदति रुद
तो वा प्राव्राजीत् कर्तृकार्ययोः क्तादौ कृति षष्ठी कर्तरि कार्ये च षष्ठी क्तादिवर्जिते कृति प्रयुज्यमाने
सति कृष्णस्य कृतिः जगतः कर्त्ता कृष्णः स्मृत्यर्थे च कार्ये षष्ठी चात् द्वितीया मातुः स्मरति मातरं स्मरति।
भयहेतौ पंचमी चौराद्बिभेति षष्ठी हेतुप्रयोगे कस्य हेतोः स्थितः कन्या इत्थंभावे तृतीया शिष्यपुत्रेण।
पश्यति तादर्थ्ये चतुर्थी संयमाय श्रुतं धत्ते नरो धर्माय संयमं धर्मो मोक्षाय मेधावी धनं दानाय मुक्त
ये २ क्त्वालोपे कर्मण्याधारे च पंचमी हर्म्यात्प्रेक्षते हर्म्यमारुह्येत्यर्थः निमित्तात् कर्मयोगे सप्तमी चर्मणि
द्विपिनं हंति दंतयोर्हंति कुंजरं अन्योक्ते प्रथमा आख्यातकृत्तसमासतद्धितोक्ते कारके संबंधे च प्रथमा
स्मात् आख्यातेन यथा क्रियते हरिः करोति कृता कृष्णः कंसं हतवान् कृष्णेन कंसो हतः पचनोग्निः।
दानीयो विप्र उपाध्यायः पचनी स्थाली समासेन प्राप्तानंदः ऊढरथः पीतांबरः तद्धितेन कौंकुमं मायु

रः छंदसि स्यादिः सर्वत्र स्यार्थे सुस्यादयः सुः दधाजुहोतीति ब्रजतीर्थ्रविरेतुः इति विभक्त्यर्थाः अथ समासः
समासश्चान्वये नाम्नां नाम्नामन्वये सति समासः स्यात् वा कृत्तद्धितधातुसंज्ञाप्रयोजकप्रत्ययाश्च विसथ
त्रिधः पूर्वपदार्थप्रधानो व्ययीभावः द्विगुतत्पुरुषोपरपदार्थप्रधानौ द्वंद्वकर्मधारयौ तु उभयपदार्थप्रधा
नौ बहुव्रीहिरन्यपदार्थप्रधानः द्वयोर्बहूनां वा पदानामेकपद्यं समासः त्रियमधिकृत्येति विग्रहे सति द्व
ते समासे अव्ययस्य पूर्वनिपातः पूर्वे व्यये व्ययीभावः अव्यये पूर्वपदे समस्ति योन्वयः सो व्ययीभावसंज्ञः स
मासः समासप्रत्यययोः समासे वर्त्तमानाया विभक्तेः प्रत्यये च परे लुक् अधिस्त्रीति जाते स नपुंसकं सोव्य
यीभावो नपुंसकं स्यात् नपुंसकस्येति ह्रस्वत्वं नामत्वात्स्यादि अव्ययीभावात् विभक्तेर्लुक् अधिस्त्रि गृह
कार्यं हरिशब्दस्य प्रकाश इति हरि विष्णोः पश्चादनुविष्णु सुराः यथासादृश्ये यथा च दृ असादृश्ये सम
स्येते शक्तिमनतिक्रम्य यथाशक्ति सादृश्ये तु यथा हरिस्तथा गुरुः अनेनामंततः अदंतात् अव्ययीभावाद्विभ
क्तेर्नेलुक किंतु अतं विना अमादेशः कुंभस्य समीपे कुंभं पश्य वा तयोः अदंतात् अव्ययीभावाद्वा ओर्म्बा सुप
उपकुंभेन कृतं उपकुंभं कृतं उपकुंभं देहि उपकुंभादानय उपकुंभं देशः उपकुंभे निधेहि उपकुंभं नि
धेहि अवधारणार्थे यावति च अवधारणार्थे यावच्छब्दे प्रयुज्यमाने योन्वयः सो व्ययीभावसंज्ञः या
वं तिष्ठमत्राणि तावतो ब्राह्मणान् आमंत्रयस्वेति यावदमत्रं इति काणमभावो निर्मक्षिकं मधुरूपस्य यो
ग्यं अनुरूपं इत्यव्ययीभावः अथ तत्पुरुषः द्वितीयाद्यंते पूर्वपदे समस्ति योन्वयः स तत्पुरुषसंज्ञः समासः
ग्रामं प्राप्तो ग्रामप्राप्तः दात्रेण छिन्नं दात्रच्छिन्नं यूपाय दारुः यूपदारुः वृकेभ्यो भयं वृकभयं राज्ञः पुरुषः राज
पुरुषः देवानां पूजकः देवपूजकः अक्षेषु शौंडः अक्षशौंडः कचिदसमाद्यंतस्य परत्वं यथा मतिक्रांतो तिरः नाव

मतिक्रांतो तिनो अग्नो आहितः आहिताग्निः पूर्वं भूतः भूतपूर्वः समासे क्वचिदेकपद्यं त्वहेतुः शरा
णां वनं शरवणं आम्राणां वनं आम्रवणं क्वचित् षष्ठी न समस्यते नृणां द्विजः सतां षष्ठः नञि नञि पूर्वपदे
योऽन्वयः सोऽपि तत्पुरुषः नाम समासे नञ अ आदेशः न ब्राह्मणोऽब्राह्मणः धर्मविरुद्धोऽधर्मः संशयस्याभावोऽसं
शयः अनस्वरे समासे नञो नादेशः स्वे अश्वादन्योऽनश्वः न ईश्वरः अनीश्वरः तदन्यत् तद्विरुद्धं तदल्पता वेपुनग्रे
इति तत्पुरुषः चार्थे द्वंद्वः समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः तत्रेश्वरं गुरुं च भजस्वेति प्रत्ये
कमेकक्रियासंबंधः समुच्चयः बटो भिक्षामट गां चानयेति क्रमेण क्रियाद्वयसंबंधोऽन्वाचयः मिलितयो
रेकत्रान्वय इतरेतरयोगः संहतिः समाहारः तत्राद्ययोर्न समासोऽसामर्थ्यात् द्वंद्वेऽल्पस्वरप्रधानेदुदंता
नां पूर्वनिपातः धवश्च खदिरश्च इतरेतरयोगे द्विवचनं उक्तार्थानामप्रयोगः धवखदिरौ नोक्तावनो
ग्पश्च नोक्तो नोऽग्नो अग्निश्च मरुच्च अग्निमरुतौ पटुश्च गुप्तश्च पटुगुप्तौ देवताद्वंद्वे पूर्वपदस्यात्वं इदु
क्वचिन्न अग्निवायू इदग्निः सोमवरुणयोः
घ्व बृहस्पतिश्च इंद्राबृहस्पती अग्निश्च विष्णुश्च अग्नाविष्णू समाहारे एकवद्भावः एकत्वे द्विगुद्वंद्वौ नपुं
अग्न्यादेः सोमादीनां सप्तम्यत्वं अग्नीषोमौ अग्नीवरुणौ शशाश्च कुशाश्च पलाशाश्च शशकुशपलाशं
सकौसः पाणी च पादौ च अनयोः समाहारः पाणिपादं अन्यश्च अन्यश्च अन्योन्यं परस्परं इति द्वंद्वः संख्यापू
अन्यादीनां विभक्तिलोपे पूर्वस्य सगागमो वाच्यः समाहारे तत्पुरुषः द्विगुः समाहारेऽर्थे द्विगुः समासोऽदंता
र्वो द्विगुः संख्यापूर्वपदे योऽन्वयः स द्विगुसमासः समाहारे तत्पुरुषः पंचाग्निपंचानां गवां समाहारः पंचगुः क्वचिन्नेप
दीपूर्पात् दशानां ग्रामाणां समाहारो दशग्रामी यस्य लोपः

मा)

प्र०स्त्र० पंचपात्रं चतुर्युगं त्रिफलेति कृत्तिः बहुव्रीहिरन्यार्थे अन्यपदार्थेयोन्वयः स ह बहुव्रीहिसंज्ञः बहुधनं यस्य स
१५ बहुधनः अस्तिधनं यस्य सोस्तिधनः बहुव्रीहौ विशेषणसप्तम्यंतयोः पूर्वनिपातः लंबौ कर्णौ यस्य स लंबकर्णः कंठेका
लः कृचिन्नपूर्वनिपातः इंदुः शेखरे यस्य स इंदुशेखरः पद्मनाभः कपिध्वजः इत्यादि नञ्दुःसुभ्यः प्रजामेधयोरसुक
न प्रजा यस्य सोप्रजाः सुप्रजाः दुर्मेधाः धर्मादन् सुधर्मा रूपवती भार्या यस्येति विग्रहे अन्यार्थे स्त्रीप्रतयांतस्यान्या
र्थे वर्त्तमानस्य ह्रस्वः स्यात् पुंवद्भा समासे सति समानाधिकरणे स्त्रीलिंगे परे पूर्वस्य स्त्रीलिंगस्य पुंवद्भावः स्यात् न तु ईकारापो वे
र्निवृत्तिः रूपवद्भार्यः वामोरूः कल्याणी प्रिया इत्यादौ न गो :गोश्च ह्रस्यान्यार्थे वर्त्तमानस्य ह्रस्वः पंचगावो यस्य स पंच
गुः संख्यासुव्याघ्रादिपूर्वस्य पादस्य ह्रस्य लोपो वाच्यः सहस्रं पादा यस्य स सहस्रपात् सुष्टु शोभनौ पादौ यस्य सः सुपात्
व्याघ्रस्य पादा इव पादौ यस्य स व्याघ्रपात् शसादौ स्वरे ईपि च पदादेशः सहस्रपदः द्विपदी इत्यादि टअउकाः स
मासे सति ट अ उ क इत्येते प्रत्ययाः स्युः यथाप्रयोगमनुसंधेयं अखिलं व्योम महिमा यस्यासो अखिलव्योममहिमः अत्राप्र
त्ययः नो वा नांतस्येलोपः स्त्रियः कारेच वामोरूतकः क्वचिन्न क्वचिदुपधालोपः अह्नो मध्यं मध्याह्नः कवीनां राजा
कविराजः अत्र टप्रत्ययः कविराजी रामः सखा यस्य स रामसखः अत्रैउः राज्ञां पूः राजपुरं वाक् च मनश्च वाङ्मनसं द
क्षिणस्यां दिशि पंथा दक्षिणापथः अहश्च रात्रिश्च अहोरात्रः द्वौ च त्रयश्च द्वित्राः पंच च षट् च पंचषाः बहवो राजा
नो यस्यां सा बहुराजा नगरी बहवः कर्त्तारो यस्य स बहुकर्तृकः प्रासादः कर्मधारयस्तुल्यार्थे पदद्वये एकार्थनिष्ठे स
ति कर्मधारयः समासः नीलं च तदुत्पलं च नीलोत्पलं रक्ता चासौ लता च रक्तलता पुंसः स्त्रियेसंयोगान्नलोपो न पु
मांश्चासौ कोकिलश्च पुंस्कोकिलः नाम्नश्च कुत्सा समासः प्रादेरुपसर्गस्य नाम्नश्च कृदंतेन सं तत्पुरुषः प्रकर्षेण वा द [illegible]
दः प्रवादः कुंभकारः महादेः मादेः समासे सति महादीनां सादिशादेशः पुत्रेण सह वर्त्तमानः सपुत्रः सहसंतिरसां सध्रि २
१५

समितिरश्यः सहांचतिसध्र्यङ् सम्यगंचतिसम्यङ् तिर्यंचतितिर्यङ् कुत्सिते कुशब्दस्य कत् कुत्सितम् अन्नं कदन्नं ईष
दुर्थे का कवो ईषदुष्णं कोष्णं कवोष्णं पुरुषे वा का कुत्सिते कापुरुषः कुपुरुषः षट्च दशाच षोडशाः षण्णां दं
धोऽर्ही दंतस्य दत् षट्प्रकारा अस्य षोढा षट् दंता अस्य षोडन् महांश्चासौ ईश्वरश्च महेश्वरः श्रेष्ठश्च मिश्र
द्यावाभूमी जायाचपतिश्च जंपती दयिताचपतिश्च दंपती आकृतिगणोयं अलुक् क्वचित् क्वचित्समासकृ।
न्नृद्धितेषु विनक्के लुक्स्यात् कृघ्रान्मुक्तः अस्तुयोनिः हृदिस्पृक् कंठेकालवा चोयुक्तिः पञ्चपतोहृतः इत्यादि
समानाधिकरणे शाकपार्थिवादीनां मध्यपदस्य लोपो वक्तव्यः शाकप्रियः पार्थिवः शाकपार्थिवः देवपूजको
ब्राह्मणो देवब्राह्मणः आदेश्च द्वंद्वे द्वंद्वसमासे आदिपदस्य लोपः माता च पिता च पितरौ श्वश्रूश्च श्वशुरश्च
श्वशुरौ ऋतां द्वंद्वे ऋदंतानां द्वंद्वे पूर्वं स्यात् मातापितरौ दुहितापुत्रौ द्वंद्वे सर्वो द्विर्वा न पूर्वापरयवराणां जसि
वा वर्णाश्रमेतरे वर्णाश्रमेतराः रात्राह्नाहांताः पुंस्येव अहोरात्रः पूर्वरात्रः पूर्वाह्णः द्व्यहः संख्यापूर्वं रात्रं क्लीबं
द्विरात्रं त्रिरात्रं अधिकरणे बहुव्रीहौ मध्यपदलोपो वाच्यः कुमुदस्य गंध इव गंधो यस्य स कुमुदगंधिः गंधादेरिः
यस्य लोपः दिक्संख्ये संज्ञायां द्विग्वादिसंख्या वा विशेष्ये समानाधिकरणे न संज्ञायामेव समस्यते स कर्मधार
यः दक्षिणाग्निः सप्तर्षयः इति समासाः अथ तद्धिताः अपत्येऽण् नाम्नोपत्यार्थे अण्प्रत्ययः स्यात् आदिस्वरस्य — तिर३
तिर३ — ज्ञोर्वृद्धिः स्वराणां मध्ये य आदिस्वरस्तस्य वृद्धिर्ञ्णिति तिव्व तद्धिते वो व्यस्वरे उवर्णस्योतश्चावृ स्यात् यकारेस्व
रेच उपगोरपत्यमौपगवः वैदुषः वाशिष्ठः भार्गवः गौतमः ऋउरण् मातृशब्दस्य ऋतु उस्यादणि परे षण्णां मातृ
णामपत्यं षाण्मातुरः कश्चिज्जवस्यापि नित्यं नमाः द्वैमातुरः शिवादिभ्योण् शैवः गांगः अतइञ् दाक्षिः अदंतानां

प्र०म०
१९

णोनसिंशत्यादिभ्यस्तस्यापत्येर्थे यस्य लोपः देवदत्तस्यापत्यं दैवदत्तिः दाशरथिः औधरिः बाहुविश्च वहोरत्वं वा
हविः गार्गिः नाडिः त्यायनणायणौ यषाः गर्गनडादिभ्यश्चापि तृषु स्वादेः गार्गीदेत्यर्थे निरउद्धिरायनणश्च आदिः स्त्री प्रत्य
योना चरायणपि तत्र स्त्रादेशोपाय त्यर्थे गार्ग्यः वात्स्यः मांडूक्यः नारायनः चारायणः गार्ग्यायणः वात्स्यायनः
आत्रेयः कापेयः माहेयः गांगेयः पितृष्वसुरपत्यं पैतृष्वसेयः मातृष्वसेयः लुग्वहुत्वेक्क क्षिल प्रत्ययस्य गर्गाः
वसिष्ठाः भृगवः अत्रयः देवतेदमर्थे देवतार्थे इदमर्थे चोक्ता वक्ष्यमाणाश्च प्रत्ययाः स्युः इंद्रो देवतास्यैन्द्रं हविः
सौम्यं आग्नेयं अग्नीषोमीयं देवदत्तस्येदं दैवदत्तं वस्त्रं क्वचिद्द्वयोः पूर्वोत्तरपदाद्योः स्वरयोः वृद्धिः द्विमाणित्ति
आग्निमारुतं णोनो वा उक्ता वक्ष्यमाणाश्च प्रत्यया णीनो वा अजगोरिदं आजगवं अजगवं वाध तुः श्वशुर
स्यायं श्वाशुर्यः श्वशुर्यः विष्णोरिदं वैष्णवं गोरिदं गव्यं कुल्यं तदीयं अन्यस्येदं कं अन्यदीयं पितुर्भ्रातरि व्यः
पितुर्भ्राता पितृव्यः मातुर्भ्रातरि डुलः मातुर्भ्राता मातुलः कारका तत्क्रियायुक्ते कारकाद्ये ते प्रत्ययाः
क्रियायुक्ते कर्त्तरि कर्मणि च कुंकुमेन रक्तं कौंकुमं वस्त्रं परिवर्तोरष्पः द्वैपे नवः द्वैपः मथुराया आगतो वास्रो०
माथुरः ग्रामे नवो ग्राम्यः धुरं वहति धुर्यः धौरेयः मनोजीनाव पत्यश्च षणो मनोर्जात्सपत्यं मनुष्यः मानुषः जातो
किं मानवः केनेयकाः कारकात्क ईन ह्य इक इत्येते प्रत्ययाः स्युः कर्त्तरि कर्मणि चोक्ता वक्ष्यमाणाश्चार्थेषु तत्र णि
तो वा कर्णाटे नवः कार्णाटकः कर्णाटको वा ग्रामादागतस्तत्र जातो वा ग्रामीणः सध्रीचीनः समीचीनः ति
रश्चीनः कुले नवः कुलीनः क्वचिद्यलोपश्च कन्यायां नवः कानीनः पुष्येण युक्ता पौर्णमासी पौषी तत्रस्या
पत्यं तन्त्रियः शुक्रो देवतास्य शुक्रियं इद्रियं अक्षैर्दीव्यति आक्षिकः हलं वहति हालिकः शब्दं करोति शा
ब्दिकः तर्के चतुरस्तार्किकः वैदिकः अध्ययसर्वादेशे प्रागकः उच्चकैः नीचकैः सर्वकः उनको त्वकं अहकं त्वतनो १९

नवाद्यर्थे त्यप्तनो प्रत्ययोस्तः कुत्र भवः कुत्रत्यः कुतस्त्यः तत्रत्यः अद्यतनः ह्यस्तनः सुदातनः स्वार्थेपि उक्ता वक्ष्यमाणा
श्च प्रत्ययाः स्वार्थेपि स्युः देवदत्त एव देवदत्तकः च वा एव वर्णाश्चातुर्वर्ण्यं चोर एव चौरः भागरूपनामभ्यो धेयः भाग एव भाग
धेयः रूपधेयः नामधेयः देवात्तः देव एव दैवतं मृदस्तिकः मृदेव मृत्तिका अणीनयोर्युष्मदस्मदोर्युष्माकास्माकौ एकार्थ
योस्तवकममकौस्तः युवयोर्युष्माकं वा अयं यौष्माकः यौष्माकीनः आवयोरस्माकं वा अयं आस्माकः आस्माकीनः तवायं ता
वकः तावकीनः ममायं मामकः मामकीनः व तुल्ये साहृश्ये षष्ठ्यर्थे वत्प्रत्ययः चंद्रेण तुल्यं चंद्रवत् मुखं घटवत् अर्हेपि विधिमर्हति वि
धिवत् भावे त्वतल्यणः श्रद्धस्य प्रवृत्तिनिमित्तं भावस्तत्र वाच्ये एते स्युः तां तं स्त्रियां त्वांतं क्लीबे ब्राह्मणस्य भावो ब्राह्मणत्वं ब्राह्म
णता ब्राह्मण्यं शुक्लत्वं वैदुष्यं समाहारिता चंचं गुणः शैला जनता कर्मण्यपि यण्वा स्यः राज्ञ इदं कर्म राज्यं राजन्यं भावे तिदि
लोपः नाविश्रणपि लघोर्भावो लाघवं गौरवं यौवनं शैशवं मौनं सौहार्दं लोहितादेर्डिमन् लोहितादेर्भावे डिमन् डि
त्स लोहितस्य भावो लोहितमा लघिमा ऋरः ऋमनि ऋतोरः स्यादिमनि प्रथिमा बहोर्लोपो भूच बहोः बहोर्परिमा
मिमना हीना मि वर्णस्य लोपो बहोर्भूरादेशश्च बहोर्भावो भूमा समर्हेर्थेपि उक्ताः प्रत्ययाः स्युः मसृराणां समहो
मायूरं कैदारिकं गाणिक्यं हास्तिकं अस्त्यर्थे मतुः नाम्नो अस्त्यर्थे मतुप्रत्ययः स्यात् गावः संत्यस्मिन् अस्य वा गोमान्
गोमती श्रीरस्यास्य श्रीमान् श्रीमती अः [illegible] मत्वर्थे नाम्न अस्यादिक स्वदंतात् वैजयंती विद्यते अस्य वैजयंतः मायि
कः दंडिकः धनिकः मांतोपधात् स्विनो मांतान्मोपधाद् वर्णांताद् वर्णोपधाच्च वतुरिंस्वदंतादस्त्यर्थे नगोपालि
तिमगवान् धनवान् पुत्रवान् विद्यावान् यशस्वान् भास्वान् लक्ष्मीवान् धनी दंडी छत्री दृषद्धली भूमिः किंवानश्रा

तद्धितप्रत्ययोः पुंवत्
हस्तिनीनाम
मरु हो॰ ५

प्यो २

प्र०म०
१७

मी यवादेर्नः यवमान् ऊर्मिमान् तडिदादिभ्यश्च वलिनौ तडित्वान् अपदात् तस्वान्नजवलं विद्युत्वान् मरुत्वान् भा
मी एतत्किंयत्तद्भ्यः परिमाणे वतुः यत्तदेतदामावतो यत्परिमाणमस्य यावान् तावान् एतावान् किमः कि इदमश्च
घश्च वतो वस्य कियान् इयान् तुन्दादेरिलः तुन्दिलः उदरिलः श्रौनत्वे दन्तादुरः दन्तुरः श्रद्धादेर्लुः श्रद्धालुः कृपालुः द
यालुः अस्मायामेधास्रग्भ्यः स्वार्थे विनिर्वाच्यः तपस्वी मायावी मेधावी स्रग्वी वाचो ग्मिनिः वाग्मी गव्यवधाना
न्तसमर्त्वे धारादेर्लः धारालः दन्तुरालः जिह्वालः आलाटौ कुत्सितभाषिणि वाचालः वाचाटः ईषदपरिसमाप्तौ क
ल्पदेश्यदेशीयाः ईषदसमाप्तः सर्वज्ञः सर्वज्ञकल्पः पटुदेश्यः पटुदेशीयः प्रकारे जातीयः पटोः प्रकारः पटुजाती
यः प्रशंसायां रूपः प्रशस्तो वैयाकरणो वैयाकरणरूपः कुत्सायां पाशः कुत्सितो भिषक् भिषक्पाशः न्तःपूर्वे च
रट् पूर्वं दृष्टो दृष्टचरः दृष्टचरी प्राचुर्ये विकारप्राधान्यादिषु मयट् अन्नप्रचुरं यस्मिन् अन्नमयं पलः मृद्विका
रो मृन्मयो घटः स्त्रीप्रधानं यस्य स्त्रीमयो जाल्मः अमृतं स्वरूपं यस्य अमृतमयश्चन्द्रः तदधीते वेद वेत्त्यणादयः
नसंधिय्वोर्युट्च संधिजयोर्य्वयोः प्रवंधिनः स्वरस्य न वृद्धिः किंतु तयोर्युडागमः वर्णान् विछिन्द्यस्य इत्वस्य
रूपश्चाद्वृद्धिः व्याकरणमधीते वेद वा वैयाकरणः स्वश्वं वेद सौवश्वः सुधात्रादेरई किमपत्यार्थे सुधातुरपत्यं
सौधातकिः व्यासस्यापत्यं वैयासकिः इतो जातार्थे लज्जा जातास्य लज्जितः फलितः कुटीशमीशुण्डाभ्यो रो ह्रस्व
त्वेर्थे ह्रस्वा कुटी कुटीरः शमीरः शुण्डारः देवतान्तात्तादर्थ्ये यः अग्निदेवतायै इदं अग्निदेवत्यं पादार्घ्याभ्यां च
पादार्थमुदकं पाद्यं अर्घ्यं तरतमेयस्विष्ठाः प्रकर्षे अतिशयेर्थे तरतम ईयसु इष्ठ इत्येते स्युः अतिशयेन शुक्लः शुक्ल
तरः शुक्लतमः ईयस्विष्ठौ इतोऽतिशयेन लघुर्लघीयान् पापीयान् लघिष्ठः पापिष्ठः लघीयसी पापीयसी गुर्वादेरि

१९

ष्ठेमेयस्सु गरादिष्ट्यलोपश्च इष्ठेमनीयस्सु परेषु गुर्वादेर्गरादिरादेशो टेर्लोपश्च गुरोर्भावो गरिमा अतिशयेन
गुरुर्गरिष्ठः गरीयान् गरीयसी युवाल्पयोः कन्वा कनीयान् कनीयसी कनिष्ठः अतिशयेन युवा यवीयान् य
विष्ठः अल्पीयान् अल्पिष्ठः प्रियस्थाद्यादेशाः प्रियस्य भावः प्रेमा अतिशयेन प्रियः प्रेष्ठः प्रेयान् अतिशयेन स्थूलः
स्थविष्ठः स्थवीयान् अतिशयेन प्रशस्यः श्रेष्ठः श्रेयान् अतिशयेन उरुः वरीयान् वरिष्ठः अतिशयेन स्थिरः स्थे
ष्ठः स्थेयान् ईलोपो ज्याश्चादादीयसः ज्यादादुत्तरस्य ईयस ईलोपः अतिशयेन वृद्धः प्रशस्यो वा ज्यायान् ज्येष्ठः
बहोरिष्ठे यिः बहोरुत्तरस्येष्ठस्य इलोपो यिरादेशो बहोर्भूश्च भूयिष्ठः भूयान् किमोऽव्ययादाख्याताच्च तरतमयोरा
म्प्रकर्षे अतिशयेन कुतः कुतस्तरां किंतमां उच्चैस्तरां गायति उच्चैस्तमां पठतितरां पठतितमां परिमाणे द
घ्नद्वयसट्मात्रटः जानुपरिमाणमस्य जानुदघ्नं शिरोद्वयसं पुरुषमात्रं द्वयोर्बहूनां चैकस्य निर्धारणे किमादि
भ्योऽडतरडतमौ स्तः नवतोः कतरः कतरः नवतां त्रिषु कतमः नवतोर्यतरस्सार्वः कस्सतरउडुणत्तु संख्ये
यविशेषावधारणे द्वितीयः द्वयोः संख्यापूर्णः द्वितीयः त्रेस्तृच्चान्तीयः तृतीयः बहुकतिकतिपयचतुर्भ्यो
स्थट् षष्ठः कतिथः कतिपयथः चतुर्थः चतुरो यियौ चलोपश्च तुर्यः तुरीयः पंचादेर्मट् पंचमः सप्तमः एका
दशादेर्डट् एकादशः द्व्यष्टनोरात्वं संख्यायामुत्तरपदेऽबहुव्रीह्यशीतौ द्वादशः अष्टादशः त्रेस्त्रयस्
त्रयोदशः विंशत्यादेर्मट् विंशतितमः विंशत्यादेस्तिलोपो डिति विंशः त्रिंशत्तमः त्रिंशः शतादेर्नित्यं शततमः
द्व्यशीतिः त्र्यशीतिः चत्वारिंशदादौ वा द्व्यष्टनोरात्वं द्विचत्वारिंशत् द्वाचत्वारिंशत् संख्यायाः प्रकारे धा द्वेध

धात २

१६:२

85

सा०प्र०
१८

॥ कारावस्य द्विधा त्रिधा चतुर्धा ध्यमोः एणवद्वैधं द्वैधं त्रैधा त्रैधं एकाद्वाकिन्नसहायेपि एकाकी क्रियाया
आवृत्तौ कृत्वसु पंचवारानितिपंचकृत्वः सप्तकृत्वः द्वित्रिभ्यांसुः द्विरुक्तं त्रिरुक्तं बहुल्याद्धा कारकाल
गासु बहुद्धा नि बहुशः अल्पशः तयड्यटो संख्याया अवयवे द्वितयं त्रितयं द्वयं त्रयं द्वितयी त्रितयी
स्त्रियां सा त्यांनञ्स्नञौ स्त्रियां नवः स्त्रैणः पुंसि नवः पौंस्नः वीप्सायां पदद्विः वृक्षं वृक्षं सिंचति ग्रामो ग्रामो
रमणीयः शेषान्निपात्याः कत्यादयः कासंख्या येषां ते कति द्वाविकः ग्रांग्रापः इति तद्धितप्रक्रियाः १

१८

प्र०स्०
१

श्रीमते रामानुजाय नमः अथाख्यातप्रक्रिया धातोः वक्ष्यमाणाः प्रत्यया धातोर्ज्ञेयाः भ्वादिः क्रियावाचको भ्वा
दिर्धातुसंज्ञः स्यात् स त्रिधा आत्मनेपदी परस्मैपदी उभयपदी चेति आदनुदात्तङितः अनुदात्तेतो ङितश्च धातोरा
त्मनेपदं स्यात् ञित्स्वरितेत उभे ञितः स्वरितेतश्च धातोरात्मपरतः परतोऽन्यत् पूर्वोक्तनिमित्तहीनाद्धातोः परस्मा
नेपदं तिवादीनामाद्यानि नव वचनानि परसंज्ञानि स्युः पराण्यपानि पराणि नव वचनान्यात्मनेपदानि तत्र ला
र्य वर्तमाने तिप् तस् अन्ति सिप् थस् थ मिप् वस् मस् ते आते अन्ते से आथे ध्वे ए वहे महे प्रारब्धोऽपरिसमाप्तश्च
वर्तमानस्तस्मिन् वर्तमाने तिबादयः प्रत्ययाः स्युः अस्य तिबादेः पाणिनीयानां लडिति संज्ञा नाम्नि च युष्मदि चास्म
द्विभागैः नामादिषूपपदेषु त्रिभिर्भागैरेते प्रत्ययाः स्युः तत्र यो नाम्नि प्रयुज्यमाने चाप्रयुज्यमाने प्रथ
मः पुरुषः स्यात् युष्मदि मध्यमः अस्मद्युत्तमः कर्तरि चेत् परस्मैपदं कर्तरि स्यात् चादात्मनेपदमपि तत्रैकत्वे
विवक्षायां प्रथमपुरुषस्यैकवचनेन तिप् पकारः पित्कार्यार्थः अप् कर्तरि धातोरप्प्रत्ययः स्यात् कर्तरि विहिते
षु तिवादिषु च तुर्षु शित्सु परेषु पकारो ङित्करणाभेदज्ञापनार्थः गुणः धातोरन्त्यस्य नामिनो गु
णः स्यात् अवादेशः भवति द्वित्वविवक्षायां भू तस् अपित्तादिर्ङित् अपिति तादिर्ङिद्वत् विना प्रत्ययो ङिद्वत् स्या
त् क्ङित्यपि क्ङिति च परे गुणवृद्धी न स्यातां द्विवचनहेतुके ङसि तु गुणः स्यात् न तस्य ङित्त्वात् गु
णः प्राप्तः अपि नित्त्वाद्गुणः भवतः बहुत्वविवक्षायां भू अन्ति अदेरतो लोपः स्यात् अन्ति परे भवन्ति
भवसि भवथः भवथ मिपि अतो दीर्घो यञि वमयोः परयोः भवामि भवावः भवामः सभा भूर्भवति त्वं साधु

१

37

भवसि अहं साधु भवामि युगपत् आशीरुपदेशे व प्रयोगः साधुः स च त्वं च भवथः विधिसंभावनयोः यात् यातां युस् यास्

यातं यात यां याव याम ईत ईयातां ईरन् ईथास् ईयाथां ईध्वं ईय ईवहि ईमहि विधिः कर्त्तव्यार्थोपदेशः संभावनं क

ल्पनम् ह्रस्वत्रयादयः स्युः एषां संज्ञा लिङ् यात्प्रतपरो याईस्यात् अद्य भवेत् भवेतां यामियं अतः परो यामियं स्या

त् भवेयुः भवेः भवेतं भवेत भवेयं भवेव भवेम शिष्यो गुरुं शुश्रूषेत् कोपि भवेत् असौ वेद विद्वान् वा ब्राह्मणत्वात् आशीःप्रेरणयोः तुप् तां अंतु

हि तं त आनिप् आवप् आमप् तां आतां अंतां स्व आथां ध्वं ऐप् आवहैप् आमहैप् अप्राप्तप्रार्थनम् आशीः प्रेरणा

पेशंसनं वा प्रेरणं प्रवर्त्तनं तत्र तुवादयः स्युः एषां संज्ञा लोट् नु ह्योस्तातङाशिषि वा वक्तव्यः ङित्वं गुणनिषेधार्थं भव

तादेशार्थं भवतु भवतात् भवतां भवंतु अतः अतः परस्य हेर्लुक् स्यात् भव भवतात् भवतं भवत भवानि भवाव

भवाम आयुष्मान् भवतु भवान् अध्ययनायोद्यतो भव सोम्य अहमात्मधि भवानि अनद्यतनेतीते दिप् तां अन् सि

प् तं त अमिप् व म त आतां अंत थास् आथां ध्वं इ वहि महि अतीतायां रात्रौ यामद्वयादर्वाग् यावदागामिन्याः

प्रथमयामद्वयं दिवसः सकलः सोद्यतनः ततोन्योनद्यतनस्तस्मिन्नतीते काले दिबादयः स्युः एषां संज्ञा लङ् दिसिमी

नामितो लाक्षणार्थः ततो नसे वा लोपः दिवादावट् दिवादौ परे धातोरडागमः स्यात् दिवादावटो अभवत् अभव

तां अभवन् अभवः अभवतं अभवत अभवं अभवाव अभवाम ह्योभवत् त्वत्पुत्रः परोक्षे णप् अतुस् उस् थप्।

अथुस् अ णप् व म ए आते इरे से आथे ध्वे ए वहे महे धातोः परोक्षेतीते काले णबादयः स्युः एषां संज्ञा लिट् भू

णप् इति स्थिते द्विश्च णबादियोगे धातोर्द्वित्वं स्यात् सस्वर आदिर्द्विः रद्विः समस्वर आद्यो ऽवयवो ऽद्विरुक्तो द्विः

स्यात् आभ्योणादौ पूर्वस्यातो ... ह्रस्वस्य चात्स्यात् णबादौ परे ह्रस्वः पूर्वस्य दीर्घस्य ह्रस्वः स्यात् रूपानां

युस इट् अतः परस्येयुस इडागमः स्यात् भवेयुः भवेः भवेत भवेत ३ ॐ

प्र०स्र०
२

जबचपाः पूर्वस्य रूपाणां जबाश्चपाश्च स्युः ऊढघधभानां जडदगबाः खफछठथानां चटतकपाः भुवो वुक् भुवो
वुगागमः स्यात् णादौ स्वरे बभूव बभूवतुः बभूवुः क्रादिणीदेः कसभृवृद्रुस्तुश्रुस्रुड्स्येतेभ्यः परस्य वसादेर्णि
ट्विधानं नस्यात् अन्यस्मात्तु स्यादिति नियमादिट् बभूविथ बभूवथुः बभूव बभूव बभूव बभूविव बभूविम ब
लिर्वेलवान् बभूव आशिषि यात् यास्तां यासुः यास् यास्तं यास्त यासं यास्व यास्म सीष्ट सीयास्तां सी
रन् सीष्ठाः सीयास्थां सीध्वं सीय सीवहि सीमहि धातोराशिषि यादादयः स्युः एषां संज्ञा लिङ् आशीर्या
दादिः परे कित् स्यात् भूयात् भूयास्तां भूयासुः भूयाः भूयास्तं भूयास्त भूयासं भूयास्व भूयास्म श्वस्तनीभा
भूयात् श्वस्तने ता तारौ तारस् तासि तास्थस् तास्थ तास्मि तास्वस् तास्मस् ता तारौ तारस् तासे तासा
थे ताध्वे ताहे तास्वहे तास्महे श्वस्तनानां विस्पष्टार्थं तादयः एषां संज्ञा लुट् सिस्यतासीष्यास्वामिट् धातोः परेषामेषा
मिडागमः स्यात् भविता भविता रौ भवितारः भवितासि भवितास्थः भवितास्थ भवितास्मि भवितास्वः भवि
तास्मः श्वभविता एनातारारामस्य स्यादेर्भविष्यति स्यप् धातोर्भविष्यति काले स्यप् स्यात् तिवाद्युष्ण ध्यसु
परेषु एषां संज्ञा लृट् भविष्यति भविष्यतः भविष्यन्ति भविष्यसि भविष्यथः भविष्यथ भविष्यामि भविष्या
वः भविष्यामः भविष्यति कल्कया वतारः स्यप् क्रियातिक्रमे क्रियाया अतिक्रमे कुतश्चित्कारणादनिष्पत्तौ
सत्यां स्यप् स्यात् भविष्यदर्थे दिवादिपरः एषां संज्ञा लृङ् यदामु वृष्टिरभविष्यत् तदासुभिक्षमभविष्यत्
अभविष्यतां अभविष्यन् अभविष्यः अभविष्यतं अभविष्यत अभविष्यं अभविष्याव अभविष्याम भूते सिः
धातोर्भूतमात्रे काले सिप्रत्ययः स्यात् दिवादिपरः एषां संज्ञा लुङ् दादेः पिपरस्मैपदे दाधास्थाभूपा लुप्

२

वलिभ्यः परस्य सेर्लोपः स्यात् नुवः सिलोपे ऽयङ्कु किंगुणेन अभरत् अभरतां अवः सिलोपे स्वरे वुग्वक्त
व्य अभरन् अभरः अभरतं अभरत अभरं अभरव अभरम अभः छि ष्ठिः इति प एध वृद्धौ अदात्मनेपदार्थः
पूर्ववदवाष्टिः एधते आदाप्यईः अतः परस्यात् आथसंबंधिन आत ई स्यात् एधेते एधंते एधसे एधेथे एध
ध्वे एधे एधावहे एधामहे घर्मादिधतेराज्यं विधिः एधेत एधेयातां एधेरन् एधेथाः एधेयाथां एधेध्वं एधे
य एधेवहि एधेमहि आशीः एधतां एधेतां एधंतां एधस्व एधेथां एधध्वं एधै एधावहै एधामहै अनद्यत
ने स्वरादेः परः स्वरादेर्धातोर्वृद्धिर्नीयोऽडागमः स्यात् ह्यस्तन्याद्यपरे ऐधत ऐधेतां ऐधंत ऐधथाः ऐधेथां ऐधध्वं
ऐधे ऐधावहि ऐधामहि परोक्षे कासादिप्रत्ययांतादाम् कृञ् स परः कासादेर्धातोर्गुरुनाम्याद्यनेकस्वरेभ्य
श्चपरोक्षायाम् आम् स्यात् स च कृञ् अस भू परः प्रयोक्तव्यः कासाम्चकार इति कासादिः एधाम् कृ कृ एइ ति
जाते रः पूर्वसंबंधिनः ऋतोऽत् स्यात् कुहोश्चुः पूर्वसंबंधिनोः कवर्गहकारयोश्चुत्वं स्यात् हस्य वर्गचतुर्थ व
र्णः एधांचक्रे एधांचक्राते एधांचक्रिरे एधांचकृषे एधांचक्राथे नामिनो वा तुर्णी धोढः नाम्यंताद्धातोः
तरस्याशिषि लिट् लुङ् लिटां धस्य ढः स्यात् एधांचकृढ्वे एधांचकृध्वे एधांचक्रे एधांचकृवहे एधांचकृमहे
एधिषीष्ट एधिषीयास्तां एधिषीरन् एधिषीष्ठाः एधिषीयास्थां सेटि हसाद्वा धोढः एधिषीढ्वं सावधानेपि
ढत्वं स्यात् एधिषीध्वं एधिषीय एधिषीवहि एधिषीमहि एधिता एधितारौ एधितारः एधितासे ए
धितासाथे एधिताध्वे एधिताहे एधितास्वहे एधितास्महे भविष्यति एधिष्यते एधिष्येते एधिष्यंते
एधिष्यसे एधिष्येथे एधिष्यध्वे एधिष्ये एधिष्यावहे एधिष्यामहे क्रियापि ऐधिष्यत ऐधिष्येतां ऐधिष्यंत

ए०न०
३

एधिष्यथाः एधिष्येथां एधिष्यध्वं एधिष्ये एधिष्यावहे एधिष्यामहे लृङि ऐधिष्ट ऐधिषातां आतां ऽतो ऽन्तनः
आतां तो ऽस्यादत्तः परस्मै न ऐधिषत ऐधिष्ठाः ऐधिषाथां धि सलोपः ऐधिढ्वं ऐधिध्वं ऐधिषि ऐधिष्वहि ऐधि
ष्महि इत्यात् डुपचष् पाके डुषानुबंधो कार्यार्थी षकारस्वरितत्वस्वरितत्व उभयपदार्थः पूर्ववट्द्वाविः पचति
पचतः पचंति पचते पचेते पचंते पचसे पचेत् पचेतां पचेयुः पचेत पचेयातां पचेरन् पचेथाः पचतु पच
तात् पचतां पचंतु पचतां पचेतां पचंतां पचस्व पचेथां अपचत् अपचतां अपचन् अपचत अपचेतां अ
पचंत अपचथाः पूर्वस्य हसादिशेषः पूर्वरूपस्यादिर्हसः शिष्यते अभ्यासहसा लुप्यंते पपच अइति जाते अ
त उपधायाः धातोरुपधायाः अतो वृद्धिः स्यात् ञ्णिति परे पपाच णादिः किन्नु णादिर्पित् किन्तु स्यात् लो
पः पचां किं एत्वाभ्यासलोपः पचादीनामनादेशादीनां कित्यणादौ सेटि थपि च पूर्वस्य लोपो न एकहसमध्यस्था
स्यै[illegible]नुस्यात् पेचतुः पेचुः वेट् थपः स्वरांतादकारवतश्च नित्यानिटस्थपो वा इट् स्यात् पेचिथ पपक्थ
पेचथुः पेच णल्वुत्तमो वा णित्[illegible] पपाच पपच पेचिव पेचिम पेचे पेचाते पेचिरे पेचिषे पेचाथे पेचिध्वे
पेचे पेचिवहे पेचिमहे पच्यात् पच्यास्तां पच्यासुः चोः कुः किं लास्यः सः कृतस्य पक्षीष्ट पक्षीयास्तां पक्षीर
न् पक्षीष्ठाः नेकस्वरादनुदात्तात् एकस्वराद्धातुपाठे अनुदात्तादिनिपठितात्पातो इण्न स्यात् स्वरांतेषु ऊदं
ताः कृप्रभृतयः सेटः ऊदंतौ यु रु क्ष्णौ इवर्णांताः श्विडीङ्शीङ्श्रिञः अदंता कथादयः ऊदंताः त्प्रभृत
यः उदंताः रोतिस्नौतिक्ष्णौतिनुत्यो[illegible] इसांतेषु कान्तः शकिः रेफो नहि घसिवसी सांतो म
निहंती नांतो रनियमिलभयोर्नाना यमिरमिनमिगमयोमांताः दिहिदुहिमिहृरिरोहलिहदिहनहि

३

दृहि लिहयोर्हान्ताः दृ क्षि दि क्षि दं क्षि म क्षि स्नु क्षि नु क्षि रि क्षि क्रोश लि वि क्षि लिहायः शान्ताः रुधि राधि पु
धि बंधि मा धि क्रु धि पुष्यति तुष्यति ष्यति सिध्यतयो धान्ताः क्षि षि पि षि पु ष्यति पुष्यति त्विषि विषि श्लिषि
तुष्यति दुष्यति श्लिष्यति [illegible] कर्षतयः षान्ताः तपि तिप्यापि वपि स्वपि लिपि लुपि तृप्यति दृप्यति सृप्यति शपि छुपि क्षि
पयः पान्ताः अदि हदि स्कं दि भिदि छिदि तु दि म दि स्विद्यति पद्यति खिदि तुदि नुदि विद्यति विदयोः दान्ताः पचि
वचि विचि रिचि सिचि मुचयश्चान्ताः छान्तः पृच्छति रंजि भजि निजि [illegible] भंजि भ्रस्जि [illegible] युजि रुजि स्वजि
मज्जति तुजि सृजि विजि तयो जान्ताः। एते निटः पक्ता पक्तारौ पक्तारः पक्तासि पक्ता पक्तारौ पक्तारः पक्तासि प
क्ष्यति पक्ष्यतः पक्ष्यन्ति पक्ष्यते पक्ष्येते पक्ष्यन्ते पक्ष्यसे अपक्ष्यत् वा न मद्य गिः पा ज्वलिष्यत् ज्वल दीप्तौ अपक्ष्यताम्
अपक्ष्यन् अपक्ष्यत अपक्ष्येताम् अपक्ष्यन्त अपक्ष्यथाः [illegible] परस्मैपदेषु सिचि [illegible] सः सिचि वृद्धिः परस्मैपदे [illegible]
शीङ्गामः अपच् स ई ड इति स्थिते अत उपधाया इति वृद्धिः चोः कुः अपाक्षीत् रुसात् रुसात् परस्मैपदे [illegible]
रु सपरे अपाक्षी स्या विदः सेराद्ले [illegible] अनुस्यात् अपाक्तुः अपाक्षीः अपाक्तं अपाक्त अपाक्षं
अपाक्ष्व अपाक्ष्म अपक्त अपक्षातां अपक्षत अपक्थाः अपक्षाथां अपग्ध्वं अपक्षि अपक्ष्वहि अपक्ष्महि।
इत्युक्ते पुनरपि परस्मैपदात्मनेपदे नयपदादि [illegible] अपते चिती संज्ञाने उपधायाः लघोः धातोरुपधाया लघो
घो र्नामिनो गुणः चेतति चेततः चेतन्ति अचेतत् चिचेत चिचितुः चिचिवतुः चिचेतिथ चित्यात् चेतिता चे
तिष्यति अचेतिष्यत् सेरिती [illegible] इटः परस्मैपदे लोपः स्यादीटि परे अचेतीत् अचेतिष्टां अचेति
षुः हुणं [illegible] इटः इदितो धातोर्नुमस्यात् आदेः ष्णः स्नः धात्वादेः षणयोः सनौ स्तः नंदति ननंद

प्र०स०
४

नोलोपः धातोर्हसांतस्योपधाभूतस्य नस्य लोपः स्यात् क्ङिति परे इति नलोपे प्राप्ते इदितो नलोपो नः नंदं
दतुः ननंदुः ननंदिथ नंद्यात् नंदिता नंदिष्यति अनंदिष्यत् अनंदीत् अनंदिष्टां अनंदिषुः अनंदीः चदि
आह्लादे चंदति चचंद चचंदतुः चचंदुः चचंदिथ चंद्यात् चंदिता अचंदीत् इदि परमैश्वर्ये इंदति ऐंदत् इं
दांकृ कृञनुप्रतिस्थिते धातोर्नामिनः धातोरंत्यस्य नामिनो वृद्धिः ञिति णिति च परे इंदांचकार ऋरं
इंदांचक्रतुः इंदांचक्रुः इंदांचकर्थ इंदांचक्र इंदांचकार इंदांचकर इंदांचकृव इंदामास इंदामासतुः
इंदांबभूव इंद्यात् इंदिता ऐंदीत् उखगतौ ओखति द्वित्वे कृते हसलोपे च उपधाया लघोरिति गुणे
कृते उ ओख अ इति जाते असवर्णे स्वरे परे य्वोरियुवौ वर्णौ युवोर्वोस्तः उवोख ऊखतुः ऊखुः उवोखि
प उख्यात् ओखिता ओखिष्यति औखिष्यत् औखीत् षिधु गत्यां सेधति प्रादेः ष्यतथातोः सुनम्रां प्राप्तेः
परेषां स्वादीनां नमादीनां च धातूनां असनयोः षोऽस्तः षत्वणत्वनिमित्ते सति निषेधति निषिषेध निषि
धतुः अट् द्वित्वव्यवधानेऽपि षः न्यषेधत् निषिषेध निषिध्यात् निषेधिता निषेधिष्यति न्यषेधीत्
विधः शास्त्रे मांगल्ये च सेधति सिषेध सिषिधतुः सिषिधुः ऊदितो वा ऊदितो धातोः परस्य वसादेरनपी
द्वा स्यात् स्वरति सूति सूयति धूञ् ... स्वरति सूति सूयति धूयां कित्साहचर्यात् दो
नित्यमिट् सिसेधिथ तथा झषां ताद्धातोः परयोस्तथयोर्धः स्यात् ढधातोर्न ऊ वेज्वा सिसेद्ध सिध्या
तु सेद्धिता सेद्धा सेधिष्यति सेत्स्यति असेधिष्यत् असेत्स्यत् अनिटो नामिवतः अवतो नामिवत्तो
निरोधातोः पेसो वृद्धिः स्यात् असैत्सीत् असैद्धां असैत्सुः असैत्सीः असैद्धं असैद्ध असैत्सं असैत्स्व

४

४३

कटेवर्षावरणयोः कटति कटेत् कटतु अकटत् चकाट कट्यात् कटिता कटिष्यति अकटिष्यत् ह्म्यं-
तक्षणश्वसजागृण्श्वेदितां से हसो न वृद्धिः अकटीत् गुपू रक्षणे आयः गुपूधूपविच्छिपणिपनिभ्यः स्वार्थे आ-
यप्रत्ययः स्यात् सधातुः यस्य इदित् प्रत्ययान्तः शेषो धातुसंज्ञः स्यात् गोपायति गोपायेत् गोपायतु अगोपायत् पत्नः
पक्षान्तस्यान पि लोपः स्यात् गोपायांचकार आयादयो न पिवासुः जुगोप जुगुपतुः जुगुपुः जुगोपिथ जुगो-
प्थ गोपाय्यात् गुप्यात् गोपायिता गोपिता गोप्ता गोपायिष्यति गोपिष्यति गोप्स्यति अगोपायिष्यत् अगो-
पिष्यत् अगोप्स्यत् अगोपायीत् अगोपीत् अगौप्सीत् धूप संतापे धूपायति धूपायांचकार दुधूप दुधू-
पतुः दुधूपुः धूपाय्यात् धूप्यात् धूपायिता धूपिता धूपायिष्यति धूपिष्यति अधूपायिष्यत् अधूपि-
ष्यत् अधूपायीत् अधूपीत् तप संतापे तपति तपेत् तपतु अतपत् ततापं तेपतुः तेपिथ ततप्थ
तप्यात् तप्ता तप्स्यति अताप्सीत् अताप्तां अताप्सुः यम उपरमे गमांछः गमयमइषूणां छो विषये यच्छति
यच्छेत् यच्छतु अयच्छत् ययाम येमतुः येमिथ ययंथ येमथुः यम्यात् यंता यंस्यति अयंस्यत् आदं-

सेप्र तानां यमिरमिनमीनां चसक् इति सक् अयंसीत् अयंसिष्टां अयंसिषुः णम प्रह्वत्वे शब्दे च प्रणमति प्रण-
मेत् प्रणमतु प्राणमत् ननाम नेमतुः नेमिथ ननंथ नम्यात् नंता नंस्यति अनंसीत् अनंसिष्टां अनं-
सिषुः गम्लृ गतौ गच्छति गच्छेत् गच्छतु अगच्छत् वै विलाप हक्योरल्पकाले पिण्णा द्विर्वक्तव्याः लप
परिनाशे सुलोहं किल विल लाप नाहक लिंग जगाम गमांस्वरे गमहनजनखनघसां लुपधायाः
लोपः स्यात् क्ङिति स्वरे न तु अङि जग्मतुः जग्मुः जगमिथ जगंथ गम्यात् गंता हन्तेः त्नः स्यः हं तेऋद्धेर्नाश्च

+ सस्वार गुणोर्त्तिसंयोगाद्योः ऋर्तेः संयोगादेर्ऋदंतस्य च गुणो यकि यु ङिकि ति राग दावा ३ी यीदादो
च सस्वरतुः सस्करः ४ २

प्र०न्र० ५

परस्य स्य पक्ष्य ङ स्या ङमे स्तुपि गमिष्यति अगमिष्यत् लि सुषादेरेः लितः पुषादेश्च ङ प्रत्ययः स्यात् पे सेरप थादः अ
गमत् स्वशेषं पदं तयोः स्मर तिस्व रिष्य स स्वर्य स्वयी त अस्वारीत् अस्वाषीत् जि जये जयति जयेत् जयतु अ
जयत् सपरोक्षयोर्जेर्गिः आदेशः जिगाय नुधातोः नुर्विकरणस्य धातोश्च वर्णो वर्णयो रिपु वोस्तः स्वरेपरे अने
कस्वरस्यासंयोगपूर्वस्य तुयो जिग्यतुः जिग्युः जिगयिथ जिगेथ जिग्यथुः जिग्य जिगाय जिगिव य अनुपियका
रेपूर्वस्वरस्य दीर्घः जीयात् जेता जेष्यति अजेषीत् अजेष्टां अजेषुः रुष रिष हिंसायां रोषति रोषेत् रुरोष रुरु
षतुः रुरुषुः रुरोषिथ रुरुषिव रुष्यात् इषुसहलुभरिषरुषामन पितसेट्वा रोषिता रोष्टा रोषिष्यति अरोषी
त् रेषति रेषेत् रेषतु अरेषत् रिरेष रिरिषतुः रिरेषिथ रिष्यात् रेषिता रेष्टा रेषिष्यति अरेषीत् व्रज गतौ
व्रजति व्रजेत् व्रजतु व्रजतात् व्रजानि अव्रजत् वव्राज वव्रजतुः वव्रजुः वव्रजिथ व्रज्यात् व्रजिता व्रजि
ष्यति अव्राजीत् अव्राजिष्टां अव्राजिषुः ञिफला विशरणे फलति फलेत् फलतु फलतात् फलतां फ
लंतु अफलत् पफाल तृफलभजत्रपनजामेत्वपूर्वलोपौ किति णवि सेटि थपि च फेलतुः फेलि
थ फल्यात् फलिता अफालीत् तॄ प्लवनतरणयोः तरति तरेत् तरतु तरतात् तराणि अतरत् तता
र ऋसंयोगाद्यो गुणः किति स्यात् तृ ऋरद्गुणः तेरतुः तेरुः तेरिथ ॠत इर् किति परे व्योर्दीर्घ हसे इति दी
र्घः तीर्यात् ईटो ग्रहां ग्रहादीनामिट ईत् वा तु णादौ वृङ्वृञ्ॠदंतानां वा इट ईत् तरिता तरीता परेसेरि
टोन दीर्घः सीणादेश्च अतारीत् अतारिष्टां अतारिषुः नज लज्जायां नजति नजेत् नजतु नजतात् अन
जत् ननाज नेजतुः नेजुः नेजिथ नज्यात् नक्ता छशषराजादेः षः षढोः कः से यातोः षढयोः

कत्वं स्यात्सेपरे न स्यति अनस्यत् अमानीत् अमाक्तां अमासुः शस हिंसायां शसति शसेत् शसतु
अशसत् शशास न शसादीनां शस दद वादि गुणभूतानां कारणामेत्वपूर्वं लोपो न स्तः शशसतुः शशसिथ शस्या
त् शसिता अशासीत् पत्लृ पतने पतति पतेत् पततु अपतत् पपात पेततुः पेतुः पेतिथ पत्यात् पतिता पतिष्य
प ति पतेर्डुमागमः अपप्तत् अव रक्षणे अवति अवेत् अवतु आवत् आव आवतुः आविथ अव्यात् अविता अ
विष्यति आविष्यत् आवीत् टुवमु उद्गिरणे वमति वमेत् वमतु अवमत् ववाम ववमतुः ववमिथ ववमिव वम्या
त् वमिता अवमीत् फण गतौ फणति पफाण फणसमुस्वनुराजादीनामेत्वपूर्वं लोपो वा फेणतुः पफणतुः
फेणुः पफणुः फेणिथ पफणिथ फण्यात् फणिता अफाणीत् स्यमु स्वनु शब्दे स्यमति सस्याम स्येमतुः सस्य
स्यमिता मतुः स्येमिथ सस्यमिथ स्यम्यात् अस्यमीत् स्वनति स्वनेत् स्वनतु अस्वनत् सस्वान स्वेनतुः सस्वनतुः स्वे
निथ सस्वनिथ स्वन्यात् स्वनिता अस्वानीत् उष दाहे ओषति ओषेत् ओषतु औषत् विदजागृउषां
वाम् उषां चकार असवर्णे स्वरे इत्यादिनोवङ् उवोष उष्यात् ओषिता औषीत् मिह सेचने मेहति मेहेत् अमे
हत् मिमेह मिमिहतुः मिमेहिथ मिह्यात् होढः स्वथोर्धः ढुनिढः ढिढोलोपो दीर्घश्च ढस्य ढे परे लोपः स्या
त् पूर्वस्य च दीर्घः मेढा षढोः कः से मेक्ष्यति अमेक्ष्यत् दशषां तात्सकहांतात् शानान्तु षान्तान्नाम्युपधा
दनिटः सक् द्विवादौ परे न तु दृशेः अमिक्षत् दह भस्मीकरणे दहति दहेत् दहतु अदहत् ददाह दे
हतुः देहिथ ददग्ध देहथुः दह्यात् दग्धा धक्ष्यति अधाक्षीत् अदाग्धां अधाक्षुः हस हसने हसति ॥

अ०५०
६

हसेव जहास हस्यात् हसिता अहासीत् एजृ कंपने एजति एजेत् एजतु एजांचकार एज्यात् एजिता एजि
ष्यति ऐजीत् ऐजिषां ऐजिषुः मह पूजायां महति महेत् ममाह मेहतुः मेहिथ मह्यात् महिता अमहीत् दृशिर्
प्रेक्षणे दृशादेः पश्यादिश्च तुर्षु दृश ऋ स्तृ शद सद पाघ्राध्माम्नादाणस्थां पश्य ऋच्छ धौ शीय सीद पिब जिघ्र
धमम नयच्छ तिष्ठासुः पश्यति पश्येत् पश्यतु अपश्यत् ददर्श ददृशतुः ददृशुः सृजिदृशोस्थपो वेट् द
दर्शिथ रारोऊसे दृशां दृशादीनां झसपरे अरोर आगमः स्यात् छशषराजादेरिति षः दद्रष्ठ ददर्शिथ वेट्
दृश्यात् द्रष्टा द्रक्ष्यति अद्रक्ष्यत् अद्राक्षीत् अद्राष्टां अद्राक्षुः इरितो वा इरितो धातोर्वोङः स्यात्वे सरप
वादः ऋ वर्णे दृशो ईगुणः अदर्शत् कृष विलेखने कर्षति चकर्ष चकृषतुः चकर्षिथ कृष्यात् क्रष्टा
क्रक्ष्यति अक्रक्ष्यत् कृषस्पृशमृशतृपदृपां वा सिः अक्राक्षीत् अक्राष्टां अक्राक्षुः कुश आह्वाने रोदने
व क्रोशति क्रोशेत् क्रोशतु अक्रोशत् चुक्रोश क्रुश्यात् क्रोष्टा क्रोक्ष्यति अक्रुक्षत् सृप्लृ गतौ
सर्पति ससर्प ससृपतुः ससर्पिथ सृप्यात् सप्ता स्रप्स्यति असृपत् पा पाने पिबति पिबेत् पिबतु
अपिबत् आतो णल औ आदन्ताद्धातोः परो णल् औ स्यात् पपौ आतोनपि अनपि किति ङिति सेट्थपि
वातो लोपः स्यात् पपतुः पपुः पपिथ वेट् पपाथ दादेरे दाधामागे हापिबति सो स्थामात एत्स्यात् या
दादेः पेयात् पाता पास्यति दादेः पे अपात् अपातां स्यावि द इत्यनेन उस्या लोपः उसि परे आ
तो लोपः स्यात् अपुः अपाः अपातं अपात अपां अपाव ष्ठा गतिनिवृत्तौ तिष्ठति तिष्ठेत् तिष्ठ

६

47

तु अलिषत् आटेः आन् निमित्ताभावे नैमित्तिकस्याभावः स्यादिति ज्ञाते ह्रिस्व नशासात्स्वपाः ह्रिस्वे कृते पत्
पूर्वं तस्य शासात्वरः स्वपः ह्रिस्वं तेन शासाः हस्वः वपश्च तस्थौ तस्थतुः तस्थिथ तस्थाथ स्थेयात् स्थाता स्था
स्यति अस्थात् अस्थाताम् अस्थुः अर्च पूजायां अर्चति आर्चत् नुगशां अश्नोतेः ऋदृद्धेः संयोगांताकारादेश्च
पूर्वस्य नुगागमो णवादौ आनर्च आनर्चतुः आनर्चुः आनर्चिथ अर्च्यात् अर्चिता अर्चिष्यति आर्चीत् आ
र्चिष्टां आर्चिषुः अर्द गतौ याचने च अर्दति अर्देत् आर्दत् आनर्द आनर्दतुः आनर्दिथ अर्द्यात् अर्दि
ता आर्दीत् अंचु गतिपूजनयोः अंचति आंचत् आनंच नो लोप इति न लोपे प्राप्ते ऋ संयोगात् इति कि
दित्त्वेन लोपो न आनंचतुः आनंचुः आनंचिथ पूजार्थांचतेर्नलोपो न अंच्यात् गतौ अच्यात् अंचि ता
अंचिष्यति आंचीत् गुपः गुपादिभ्यः स्वार्थे सप्रत्ययः स्यात् तस्मिन्न् सति धातो ह्रिस्व कितिरोगापनय
ने संशये च मधातुः अहेः चिकित्सति चिकित्सेत् चिकित्सतु अचिकित्सत् चिकित्सांचकार चिकित्स्यात्
चिकित्सिता चिकित्सिष्यति अचिकित्सीत् तिज निशाने क्षमायां च तितिक्षते तितिक्षेत् अतितिक्षत
तितिक्षां चकार तितिक्षिष्यात् तितिक्षिता अतितिक्षीत् ऋ गतौ ऋच्छति ऋच्छेत् ऋच्छतु आर्च्छत् आर गु
णर्तिसंयोगाद्योः [illegible] किति [illegible] आरतुः आरुः
अत्यर्तिव्ययतीनां थपो नित्यमिट् आरिथ अर्यात् अर्ता अरिष्यति सर्तिशास्त्यर्तिभ्यो लुङि सेरणवा
दः आरत् अपि रंजि दंश षंज ष्वंजां एषां नस्य लोपः स्यात् दपिपरे दशति दशेत् दशतु अदशत्

प्र०ल०

ददंश ददंशतुः ददंशिथ दश्यात् दंष्टा दंक्ष्यति अदाङ्क्षीत् अदांष्टां अदाङ्क्षुः षंज संगे सजति सजे
त् असजत् ससंज सज्यात् संक्ता संक्ष्यति असाङ्क्षीत् ग्लै म्लै हर्षक्षये ग्लायति ग्लायेत् ग्लायतु अग्
लायत् संध्यक्षराणामा त्वंस्यादेशपि जग्लौ जग्लतुः जग्लिथ जग्लाथ संयोगादेरातो धातोर्यण्वतः लिङि वा एत्वं
वेद्या ग्लेयात् ग्लायात् ग्लाता ग्लास्यति अग्लासीत् अग्लासिष्टां अग्लासिषुः कै गै रै शब्दे कायति च
क्रे कायात् काता कास्यति अकासीत् अकासिष्टां गायति गायेत् गायतु अगायत् जगौ जगतुः जगि
थ गेयात् गाता गास्यति अगासीत् रायति ररौ ररिथ रराथ रायात् राता अरासीत् ध्यै चिंतायां ध्यायति ध्या
येत् ध्यायतु अध्यायत् दध्यौ दध्यतुः अधायत् दधौ दधतुः धेयात् धाता धास्यति धाद्धेपे इति सिच्निष्पत्ती
पेघ्राधे साच्छाशाघ्राधेट्भ्यो वा सिच्लोपः अधात् अधातां अधुः अधासीत् अधासिष्टां अधासिषुः श्रु श्र
वणे श्रुवः शृ आदेशो नुप्रत्ययश्च विषये नुपः नुप्रत्ययस्य उप्रत्ययस्य च गुणः स्यात् पिति शृणोति ।ते
शृणुतः शृण्वंति शृणोषि शृणुथः शृणुथ शृणोमि उओर्मो वा लोपः प्रत्ययसंबंधिनो धातोश्चासंयोगा
दुत्तरस्य उतो लोपो वा म्वोः परयोः शृण्वः शृण्मः शृणुवः शृणुमः शृणुयात् शृणोतु शृणुतां शृण्वंतु
उतो हेः प्रत्ययसंबंधिन उतः परस्य हेर्लुक् वा अह्वा संयोगात्परस्य न तु हि स्वत्र तस्मात् शृणु शृणुता
त शृणुत शृणवानि अशृणोत् अशृणुतां अशृण्वन् शुश्राव शुश्रावनुधातोः शुश्रुवतुः शुश्रुवुः शुश्रोथ शु
श्रुव श्रूयात् श्रोता श्रोष्यति अश्रौषीत् अश्रौष्टां अश्रौषुः जि जये जयति जयेत् जिजाय जिजिय

दधिथ धे
यात् ध्याथा
तु ध्याता
ध्यास्यति
अध्यासीत्
धेरवा नेध
यति धयेत
धयत्

49

यि
चिक्षियतुः चिक्षियिथ चिक्षेथ चिक्षियिव क्षीयात् क्षेता क्षेष्यति अक्षैषीत् अक्षैषं स्रु गतौ स्रवति स्रवेत्
अस्रवत् सुस्राव सुस्रुवतुः सुस्रोथ सुस्रुव स्रूयात् स्रोता णिश्रिद्रुस्रुभ्यो धातोः चङ् लुङि चङ् सेरनादेः असु
स्रुवत् द्रु गतौ द्रवति द्रवेत् अद्रवत् दुद्राव दुद्रुवतुः दुद्रोथ दुद्रुव द्रूयात् द्रोता अदुद्रुवत् तक्ष तनूकरणे
तक्ष तनूकरणे तक्ष्णोति तक्षति काष्ठं तक्ष्णुयात् तक्षेत् तक्ष्णोतु तक्षतु अतक्ष्णोत् अतक्षत् ततक्ष
ततक्षतुः ततक्षिथ स्कोः संयोगाद्योरन्ते च इति कलोपः ततष्ठ तक्ष्यात् तक्षिता तष्टा तक्षिष्यति तक्ष्यति अतक्षी
त् अतक्षिषं अतक्षिषुः अताक्षीत् अताक्षं अताक्षुः शद्लृ शातने शीयादेशे आत्मने शीयते शीयेत
शीयतां अशीयत शशाद शेदतुः शेदिथ शशत्थ शद्यात् शत्ता शत्स्यति अशदत् षद्लृ विशरणगत्यवसा
दनेषु सीदति सीदेत् असीदत् ससाद सेदथ सद्यात् सत्ता सत्स्यति असदत् घ्रा गन्धोपादाने जिघ्रति जघ्रौ
जघ्रतुः जघ्रिथ जघ्राथ घ्रेयात् घ्रायात् घ्राता घ्रास्यति अघ्रासीत् अघ्रात् ध्मा शब्दाग्निसंयोगयोः
धमति धमेत् अधमत् दध्मौ दध्मतुः दध्मिथ दध्माथ ध्मेयात् ध्मायात् ध्माता ध्मास्यति अध्मासीत्
म्ना अभ्यासे मनति मनेत् अमनत् मम्नौ मम्नतुः मम्निथ म्नेयात् म्नाता म्नास्यति अम्नासीत् दाण् दाने
यच्छति यच्छेत् यच्छतु अयच्छत् ददौ ददतुः ददिथ ददाथ ददिव देयात् दाता दास्यति अदात् अदातां
अदुः अत सातत्यगमने अतति अतेत् अततु आतत् आत आततुः आतिथ अत्यात् अतिता
अतिष्यति आतीत् जु रंहसि जवति जवेत् अजवत् जुजाव नानर्था वः अनपि विषये धातोरुव
ण्यवत्वं न स्यात् किं तु उवेव जुजुवतुः जुजुवुः जुजविथ जुजोथ जूयात् जोता जोष्यति अजौषीत्

व

ग्रं०सं०
८

अजोषं अजोषुः सृ गतौ धावति शीघ्रगतौ अन्यत्र सरति धावेत् धावतु अधावत् ससार ससृतुः ससुः ससर्थ ससृवया
हादौ यादादौ रितोऽथ ह्रस्यात् ह्यवधानात् यङ्ति दीर्घः स्रियात् सर्त्ता सरिष्यति सर्त्तिशास्त्यादिना ऋः असरत्
रुह बीजजन्मनि प्रादुर्भावे च रोहति रोहेत् रोहतु अरोहत् रुरोह रुरुहतुः रुरोहिथ रुह्यात् रोढा रोक्ष्यति अरुक्षत्
स्कंदिर् गतिशोषणयोः स्कंदति स्कंदेत् चस्कंद स्कंद्यात् स्कंत्ता स्कंत्स्यति अस्कान्त्सीत् अस्कान्ता अस्कदत् वस निवा-
से वसति वसेत् अवसत् णवादौ पूर्वस्य यजादीनां ग्रहादीनां च पूर्वस्य संप्रसारणं स्यात् णवादौ परे सस्वरस्य संप्रसा-
णां दीर्घस्य दीर्घः ह्रस्वस्य ह्रस्वः उवास यज्ञायवराणा यतः संप्रसारणं किति यजादीनां संप्रसारणं स्यात् किति परे यजि
वपि वही चेव वेञ् ह्वेञ् हु यत्ति स्वपी वदसी श्वयतिर्वञ्कि रेकादश यजादयः १ घसादेशः घसिशासिवसीनां सस्य षादे-
शः स्यान्निमित्ते सति ऊषतुः ऊवसिथ उवस्थ उष्यात् वस्ता सस्योनपि सस्य तो नापस्य वत्स्यति अवात्सीत् अवात्तां अ-
वात्सुः वद व्यक्तायां वाचि वदति वदेत् वदतु अवदत् उवाद ऊदतुः उवदिथ उद्यात् वदिता वदिष्यति अवादीत्
टुओश्वि गतिवृद्ध्योः श्वयति श्वयतेर्णौ वा संप्रसारणं पश्चाद्द्वित्वं शुशाव शुशुवतुः शुशविथ शिश्वाय शिश्वि-
यतुः शिश्वयिथ शूयात् श्वयिता अश्वयीत् श्वयते रिलोपो ङे अश्वत् श्वयतेर्ई ढि त्वं वा एरलोपश्च अशिश्वि-
यत् अशिश्वियतां इति पि ईक्ष दर्शनांकनयोः ईक्षते ईक्षेत ईक्षतां ऐक्षत ऐक्षेतां ऐक्षंत ईक्षांचक्रे ईक्षिषीष्ट ई-
क्षिता ईक्षितासे ईक्षिष्यते ऐक्षिष्यत ऐक्षिष्येतां ऐक्षिष्यंत ऐक्षिष्ट ऐक्षिषातां ऐक्षिषत ष्वञ्ज परिष्वंगे स्वजते स्व-
जेत स्वजतां अस्वजत स्वजेर्णौ द्वित्वाकित्व सस्वजे सस्वजाते सस्वजिरे सस्वंजे सस्वंजाते सस्वंजिरे स्वङ्क्षीष्ट
स्वङ्क्ता स्वङ्क्ष्यते अस्वङ्क्त अस्वङ्क्षातां अस्वङ्क्षत त्रपूष् लज्जायां त्रपते त्रपेत त्रपतां अत्रपत त्रेपे त्रेपाते त्रेपिरे त्रेपिषे अत्रपिष्ट अत्रपिषातां अ-
त्रपिषत अपिता त्रप्ता त्रपिष्यते त्रप्स्यते अत्रप्स्यत ... नर्जीमिस्येत्वं त्रेपे त्रेपाते त्रेपिरे त्रेपिषे त्रपिषीष्ट

च
८

घ२

त्रपिषत अत्रप्त अत्रप्सातां अत्रप्सत अत्रप्स्थाः गुपू गोपनकुत्सनयोः गुप इति सः जुगुप्सते जुगुप्सेत जुगुप्सा
तां अजुगुप्सत जुगुप्सां चक्रे जुगुप्सिषीष्ट जुगुप्सितासे जुगुप्सिष्यते अजुगुप्सिष्यत अजुगुप्सिष्ट अजुगुप्सिषातां
अजुगुप्सिषत मान विचारणे यस्य पूर्वस्मात् इत्यात्सेपरे मानादीनां सेपरे दीर्घो वक्तव्यः मीमांसते मीमांसे
अ४
सि४
चक्रे मीमांसिषीष्ट मीमांसिष्ट बध निंदायां आदिजबानामिति नः वीभत्सते वीभत्सेत वीभत्सांचक्रे वीभत्सि
षीष्ट वीभत्सितासे वीभत्सिष्यते अवीभत्सिष्ट दान शान तेजने दीदांसते दीदांसांचक्रे दीदांसिषीष्ट दीदां
सितासि अदीदांसिष्ट शीशांसते शीशांसेत शीशांसांचक्रे शीशांसिषीष्ट शीशांसिता शीशांसिष्यते अशीशां
सिष्ट पण व्यवहारे स्तुतौ च पन च पणायति स्तुतावेवायः तदर्थत्वाय प्रत्ययान्तात् पणेर्नात् पणते इत्यत्र चरि
तार्थत्वात् पणते पणतां अपणत अपणायांचकार पेणे पणाय्यात् पणिषीष्ट पणायितासि पणितासे
पणायिष्यति पणिष्यते अपणायिष्यत अपणिष्यत अपणायीत् अपणायिष्टां अपणायिषुः अपणिष्ट
अपणिषातां अपणिषत एवं पनायति पनते घट चेष्टायां घटते घटेत घटतां अघटत जघटे घटिषीष्ट घ
टिता घटिष्यते अघटिष्ट माङ् माङ्योगे ऽट्लोपः स्यात् मा घटिष्ट स्मयोगेपि अट्लोपः एवं स्मरेत् मा
ऽलुङ् एवं मा भूत् ईह चेष्टायां ईहते ईहेत ईहांचक्रे ईहिषीष्ट ईहिता ऐहिष्ट ऊह वितर्के ऊहते
ऊहेत औहत ऊहांचक्रे ऊहिषीष्ट ऊहिता औहिष्ट कासृ शब्दकुत्सायां कासते कासांचक्रे कासि
षीष्ट कासितासे कासिष्यते अकासिष्ट काशृ दीप्तौ काशते अकाशत चकाशे चकाशाते चकाशि

प्र०म०
ऐ

रे च काशिषे काशिषीष्ट काशितासे अकाशिष्यत अकाशिष्ट डीङ् विहायसा गतौ डयते डयेत डयतां अड-
यत डिड्ये डिड्याते डिड्यिरे डयिषीष्ट डयिता अडयिष्ट द्युत दीप्तौ द्योतते द्योतेत द्योततां अद्योतत द्युतेः पू-
र्वस्य संप्रसारणं दिद्युते दिद्युताते दिद्युतिरे दिद्युतिषे द्योतिषीष्ट द्योतितासे द्योतिष्यते द्युताद्भ्यो लुङि
वा पंपदः स्यात् अद्युतत् अद्योतिष्ट श्विता वर्णे श्वेतते श्वेतेत श्वेततां अश्वेतत शिश्विते शिश्विताते शि-
श्वितिरे शिश्वितिषे श्वेतिषीष्ट श्वेतिता अश्वितत् अश्वेतिष्ट ञिमिदा स्नेहने मेदते अमेदत मिमेदे मिमि-
दिषे मेदिषीष्ट मेदितासे मेदिष्यते अमिदत् अमेदिष्ट ञिश्विदा स्नेहनमोचनयोः ञिक्ष्विदा च श्वेदते शि-
श्विदे शिश्विदिवहे श्वेदितासे अश्विदत् अश्वेदिष्ट क्ष्वेदते क्ष्वेदेत अक्ष्वेदत चिक्ष्विदे चिक्ष्विदिवहे क्ष्वे-
दिषीष्ट क्ष्वेदिता अक्ष्विदत् अक्ष्वेदिष्ट रुच दीप्तावभिप्रीतौ च रोचते रुरुचे रोचिषीष्ट अरुचत् अरोचि-
ष्ट वृतु वर्तने वर्तते ववृते ववृताते ववृतिरे ववृतिषे वर्तिषीष्ट वर्तिता वृद्भ्यः स्यसनोर्वा वृतादिभ्यः
पर्ययोर्नोपं स्यात् न वृद्भ्यश्चतुर्भ्यः वृतादिभ्यः पे नेट् वर्त्स्यति वर्तिष्यते अवर्त्स्यत् अवर्तिष्यत अववृतत्

स्यस्

अवर्तिष्ट वृधु वृद्धौ वर्धते ववृधे ववृधिषे वर्धिषीष्ट वर्धितासे वर्त्स्यति वर्धिष्यते अवृधत् अवर्धि-
ष्ट शृधु शब्दकुत्सायां शर्धते शशृधे शशृधिषे शर्धिषीष्ट शर्त्स्यति शर्धिष्यते अशृधत् अशर्धिष्ट
स्यंदू प्रस्रवणे स्यंदते स्यंदेत अस्यंदत सस्यंदे सस्यंदिवहे स्यंदिषीष्ट स्यंत्सीष्ट स्यंदिता स्यंत्ता स्यंत्स्यति
स्यंदिष्यते अस्यंदत अस्यंदिष्ट अस्यदत् अस्यंत्सातां अस्यंत्सत कृपू सामर्थ्ये कृपो रो लः कृपेरेफस्य लः ऋ-
तो लृश्च कल्पते कल्पेत चक्लृपे चक्लृपिषे कल्पिषीष्ट सिस्योः सिस्योरनिटोः परतउपधाया गुणो न स्यात्

ऐ

53

क्लृप्सीष्ट कल्पिता कल्प्ता कल्पिष्यते कल्प्स्यते अकल्पिष्यत अकल्प्स्यत अक्लृपत् अकल्पिष्ट अक्लृप्त इति द्युतादिः
रमु क्रीडायां रमते रमेत रमतां अरमत रेमे रेमाते रेमिरे रेमिषे रंसीष्ट रंता रंस्यते अरंस्यत अरंसातां अरंसत व्यथ दुःखसंच
लनयोः व्यथते व्यथेत व्यथेर्लिटि पूर्वस्य संप्रसारणं विव्यथे विव्यथाते व्यथिषीष्ट व्यथिता अव्यथिष्ट शकि शंकायां
शंकते शशंके शंकिषीष्ट शंकिता अशंकिष्ट अकि लक्षणे अंकते आनंके अंकिषीष्ट अंकिता आंकिष्ट॥
बाधृ लोडने बाधते बबाधे बाधिषीष्ट बाधिता अबाधिष्ट ढौकृ गतौ ढौकते ढौकेत अढौकत डुढौके ढौकिषीष्ट ढौकि
ता अढौकिष्ट दध धारणे दधते दधे देधिषे दधिषीष्ट अदधिष्ट वदि अभिवादनस्तुत्योः इदितो नुम् वंदते वंदेत
अवंदत ववंदे ववंदिषे वंदिषीष्ट वंदिता अवंदिष्ट दद दाने ददते ददेत ददतां ददाते दददे दददिरे ददिषे ददि
षीष्ट अददिष्ट यती प्रयत्ने यतते यतेत यततां अयतत येते येतिषे यतिषीष्ट यतिष्यते अयतिष्ट षह मर्षणे स
हते सहेत सहे सेहिषे सहिषीष्ट सहिता इषुसहलुभ इत्यादिना वेट् सहिवहोरोदवर्णस्य सहिवहोर्धातोरवर्णस्य ओत्स्या
त् ढलोपे सति सोढा सहिष्यते असहिष्यत असहिष्ट तिपृ क्षरणे तेपते तितिपे तितिपिषे तेप्ता अतिप्त अतिप्सातां अ
तिप्सत इत्यादि राजृ दीप्तौ राजति राजेत् राजेत राजतु राजतां अराजत् अराजत रराज रेजतुः रराजतुः रेजे रेजाते ररा
जे राज्यात् राजिषीष्ट राजिता २ राजिष्यति राजिष्यते अराजिष्यत् अराजिष्यत अराजीत् अराजिष्ट खनु खनने ख
नति खनते खनेत् खनतु खनतां अखनत् अखनत चखान गमहनेति चख्नतुः चख्नुः चखनिथ चख्ने चख्नाते खन्यात्
खनिषीष्ट खनिता २ खनिष्यति खनिष्यते अखानीत् अखनिष्ट हृञ् हरणे हरति हरते हरेत् हरेत हरतु हरतां अ

श्री

चख्निरे २ चखेरे ति

प्र०स० हरत् अहरत जहार जह्रतुः जह्रुः ऋदंतात् थपो नेट् जहर्थ जहृव जह्रे जह्राते जह्रिरे ह्रियात् उः ऋ वर्णस्यासि स्यो
१० रनिटोः परयोर्गुणो न स्यात् हृषीष्ट हर्तार हरिष्यति हरिष्यते अहार्षीत् अहार्ष्टां अहार्षुः लोपो ह्रस्वात् झसे ह्रस्वात् परस्य से
र्लोपो झसि परे अहृत अहृषातां अहृषत भृञ् भरणे भरति भरते भरेत् भरेत भरतु भरतां अभरत् अभरत बभार
बभ्रतुः बभ्रुः बभर्थ बभृव बभ्रे बभ्राते बभ्रिरे बभृषे बभृढ्वे भ्रियात् भृषीष्ट भर्तार भरिष्यति अभार्षीत् अभृत॥
धृञ् धारणे धरति धरते दधार दध्रतुः दध्रुः दधर्थ दध्रे दध्राते दध्रिरे ध्रियात् धृषीष्ट धर्तार धरिष्यति धरिष्यते
अधार्षीत् अधार्ष्टां अधार्षुः अधृत अधृषातां अधृषत भज सेवायां भजति भजते भजेत् भजेत भजतु भजतां
अभजत् अभजत बभाज भेजतुः भेजुः भेजिथ बभक्थ भेजे भज्यात् भक्षीष्ट भक्तार भक्ष्यति भक्ष्यते अभाक्षीत्
अभाक्तां अभाक्षुः अभक्त अभक्षातां गुहू संवरणे गुहेरुपधाया दीर्घो गुणहेतौ स्वरे गूहति गूहते गूहेत गूहतु गूहेत
गूहतां अगूहत् अगूहत जुगूह जुगुहतुः जुगुहुः जुगूहिथ जुगोढ जुगुहथुः जुगुह जुगूह जुगुहिव जुगुहे जु
गुहाते जुगुहिरे जुगुहिषे जुघुक्षे गुह्यात् गूहिषीष्ट घुक्षीष्ट गूहिता२ गोढा२ गूहिष्यति घोक्ष्यति गूहिष्य
ते घोक्ष्यते अगूहीत् अगूहिष्टां अगूहिषुः अघुक्षत् अगूहिष्ट अघुक्षत श्रिञ् सेवायां श्रयति श्रयते शिश्राय
शिश्रियतुः शिश्रियुः शिश्रयिथ शिश्रिये श्रीयात् श्रयिषीष्ट श्रयिता२ श्रयिष्यति श्रयिष्यते श्रिस्रुद्रुभ्यो ङ्
लिङः अशिश्रियत् अशिश्रियत त्विष दीप्तौ त्वेषति त्वेषते तित्विषे त्विष्यात् त्विक्षीष्ट त्वेष्टा२ अत्विक्षत् अत्वि
क्षत रंज रागे रजति रजते रजेत् रजेत ररंज ररंजतुः ररंजुः ररंजिथ ररंक्थ ररंजाते ररंजिषे रज्यात् रंक्षीष्ट रंक्ता२ राम०
रंक्ष्यति रंक्ष्यते अरांक्षीत् अरांक्तां अरांक्षुः अरंक्त अरंक्षातां अरंक्षत णीञ् प्रापणे नयति नयते निनाय निन्यतुः १०

55

निन्युः निनयिथ निनेथ निन्ये निन्याते निन्यिरे निन्यिषे नीयात् नेषीष्ट नेतार नेष्यति नेष्यते अनैषीत् अनैष्टां अनै-
षुः अनेष्ट अनेषातां अनेषत यज देवपूजासंगतिकरणदानेषु यजति यजते यजेत् यजेत इयाज ईजतुः ईजुः इ-
यजिथ इयष्ठ ईजे ईजाते ईजिरे इज्यात् यक्षीष्ट यष्टार यक्ष्यति यक्ष्यते अयाक्षीत् अयाष्टां अयाक्षुः अयष्ट अयक्षा-
तां अयक्षत टुवप बीजसंताने वपति वपते वपेत् वपेत वपतु वपतां उवाप ऊपतुः ऊपुः उवपिथ उवप्थ ऊपे उप्या-
त् वप्सीष्ट वप्तार वप्स्यति वप्स्यते अवाप्सीत् अवाप्तां अवाप्सुः अवप्त अवप्सातां अवप्सत वह प्रापणे वहति वह-
ते उवाह ऊहतुः उवहिथ उवोढ ऊहे उह्यात् वक्षीष्ट वोढार वक्ष्यति अवाक्षीत् अवोढां अवाक्षुः अवोढ अवक्षातां अव-
क्षत व्यय गतौ व्ययति व्ययते वव्याय वव्ययतुः वव्ययुः वव्ययिथ वव्यये वव्ययाते वव्ययिरे वव्ययिषे व्ययात्
व्ययिषीष्ट व्ययितार व्ययिष्यति व्ययिष्यते अव्ययीत् अव्ययिष्टां अव्ययिषुः अव्ययिष्ट अव्ययिषातां अव्ययि-
षत वेञ् तंतुसंताने वयति वयते वयेत् वयेत अवयत् अवयत वेञो ण्यादेर्न संप्रसारणं ववौ ववतुः ववुः
वेञः स्यपो नित्यमिट् वविथ ववथुः वव ववौ ववि व ववे ववाते वविरे वविषे वेञो वयूण वादेशो उवाय ऊ-
हां किति च ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चति पृच्छति भृज्जतीनां ङिति परे संप्रसारणं स्यात् वयोयस्य ने
त्वं ऊयतुः उवयिथ ऊयथुः ऊये ऊयाते ऊयिरे ऊयिषे वायात् वासीष्ट वातार वास्यति वास्यते अवासीत्
अवास्त व्येञ् संवरणे व्ययति व्ययते व्येञो णवादेर्नात्वं विव्याय विव्यतुः विव्युः विव्ययिथ विव्ये विव्याते विव्यि-
रे वीयात् व्यासीष्ट व्याता व्यास्यति व्यास्यते अव्यासीत् अव्यासिष्टां अव्यासिषुः अव्यास्त अव्यासातां अव्या-
सत शप आक्रोशे शपति शपते शपेत् शपेत अशपत् अशपत शशाप शेपतुः शेपुः शेपिथ शेपे शेपाते शे-

प्र०न०
११

पिपेरे शेपिषे शप्यात् शप्सीष्ट शप्ता २ शप्स्यति शप्स्यते अशाप्सीत् अशाप्तां अशाप्सुः अशप्त अशप्सातां अशप्सत ५
सुने भ्वादिष्वि अदने लणे अदा देर्लुक अदादेः परस्मापो लुक स्यात् अत्ति अत्तः अदंति अत्सि अत्थ अद्मि अद्मः
अद्यः अद्यात् अत्तु अत्तात् अत्तां अदंतु रुसा हि हे रुसा हल्भ्यस्य हेर्द्धिः स्यात् अद्धि अत्तात् अत्तं अत्त अदानि
अदो दिस्पोरडागमो वक्तव्यः आदत् आत्तां आदन् आदः आत्तं आत्त आदं आद्व आद्म आद आदतुः आदुः आ

रदे ५

